DIPLOMA IN SANSKRIT
**Paper - IV (Part - C)**

# NIBANDAHA

**Directorate of Distance Education**

Rashtriya Sanskrit Vidyapeetha
Tirupati - 517 501(A.P.)

**निबन्धः**; Diploma In Sanskrit Examinations मध्ये चत्वारि पत्राणि सन्ति। तत्र चतुर्थपत्रे Part-C रूपेण निबन्धः आयोजितः अस्ति। तत्र एकः एव प्रश्नः समाधातव्यः अस्ति। तस्य कृते विंशति अङ्काः सन्ति। तस्मिन् विषये अभ्यासदानाय प्रवृत्तः अयं पाठ्यांशः।

**परिचयः**; निपूर्वक ' बध् ' धातोः अच् प्रत्यये कृते निष्पन्नम् इदं पदम्। ग्रथनम्, रचनम्, इत्यर्थः भवति। अत्र विश्लेषणपुरस्सरं एकः विषयः उपपाद्यते, अथवा निबध्यते।एषः निबन्धः भवति। अस्यैव आंग्लभाषायां Composition, Essay, इति पदानि सन्ति। अत्र च विषयः शीर्षिका इति नाम्ना व्यवहृतम् अस्ति। अनुपदमेव शीर्षिकायाः अर्थः, शीर्षिकायाः अभिप्रायश्च,दत्तः। विश्लेषणपुरस्सरं च विषयः विभज्य प्रदर्शितः। विद्यार्थिभिः सावधानैः पठनीयं भवति।

**लक्ष्याणि** ; लेखनं विषयावगाहनस्य स्वच्छताम्, समग्रताम्, व्यक्तीकरोति। तस्मादेव च शतवारं पठनापेक्षया एकवारं लेखनं वरं भवति इति अनुभवोक्तिः आगता। लेखनस्य तादृशं प्राशस्त्यं वर्तते। अपि च श्रवण,पठन, लेखन, भाषणानि चत्वारि भाषाकौषलानि सन्ति। चतुर्षु अपि एतेषु अन्योन्यवर्धकत्वम् यद्यपि अस्ति , तथापि स्वतन्त्रलेखनं विषयनिरूपणाय , श्रेष्ठतमं साधनं, श्रेष्ठतमं मापनं च। लेखनं हि निबन्धस्य हृदयं भवति। अतः लेखनस्य यानि प्रयोजनानि तान्येव निबन्धस्य अपि भवन्ति। अतः निबन्धस्य अभ्यासनद्वारा –

- संस्कृतभाषागतं लेखनकौशलं वर्धितं भवति।
- संस्कृतभाषागतं वाक्यरचनाकौशलं वर्धितं भवति।
- संस्कृतभाषागतं पदकोशं वर्धितं भवति।
- विषयस्य संस्कृतभाषयाम् आलोचनं वर्धितं भवति।
- विषयस्य आलोचनागता उपपादनारीतिः अभ्यस्ता भवति भवति।
- विषयस्य लेखन गता उपपादनारीतिः अभ्यस्ता भवति भवति।

**अभ्यसनाय निर्दिष्टाः निबन्धाः—**

१.सर्वः स्वार्थं समीहते

२.उपायेन हि यच्छक्यंन तच्छक्यं पराक्रमैः

३.यत्ने कृतेयदिन सिध्यति कोऽत्र दोषः

४.मित्रद्रोहे च पातकम्

५.सहसा विदधीत न क्रियाम्।

६.न युक्तं कूपखननं सन्दीप्ते वह्निना गृहे।

७.धूमशकटसौकर्याणि

८.स्त्रीस्वातन्त्र्यम्

९.व्यायामः

१०.ग्रन्थालयस्य आवश्यकता

११.जीवन् भद्राणि पश्यति

१२.नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण

१३.न संशयमानारुह्य नरो भद्राणि पश्यति

१४. अश्नुते हि स कल्याणं–व्यसने यो न मुह्यति

१५. गुणवद्वस्तुसंसर्गाद्यातिस्वल्पोपि गौरवम्

१६. नहि कृतमुपकारं साधवो विस्मरन्ति

१७. सम्पत्तौ च विपत्तौ च महतामेकरूपता

१८. संस्कृतभाषाप्रचारोपायाः

१९. धनमूलमिदं जगत्

२०. कर्तव्यमेव कर्तव्यं प्राणैः कण्ठगतैरपि

# सर्वः स्वार्थं समीहते

**संरचना**

१.०. शीर्षिकायाः अर्थः
१.१ शीर्षिकायाः अभिप्रायः
१.२.स्वार्थस्य अपरिहरणीयता
१.३.स्वार्थातिशयस्य परित्यागः
१.४.सर्वजनहितस्वार्थस्य आवश्यकता
१.५.उपसंहारः

## १.०. शीर्षिकायाः अर्थः

सर्वः = सकलः (जन्तुः) ; स्व + अर्थम् = स्वार्थम्, स्व = आत्मनः ; अर्थम् = प्रयोजनम् ; समीहते = सम्यक् अभिलषति; इति शीर्षिकायाः अर्थः।

## १.१ शीर्षिकायाः अभिप्रायः

अत्र समीहते इति पदं सम्पूर्वकात् इह धातोः निष्पन्नत्वात् इच्छाजन्यक्रियानिष्फत्तिपर्यन्तं अर्थं बोधयति। तेन सर्वोऽपि स्वप्रयोजनं लब्धुं प्रयत्नं करोति इत्यर्थः लभ्यते। अत्र अर्थपदेन '**अर्थोऽभिधेय रै वस्तु-प्रयोजन-निवृत्तिषु**' इति निघण्टूक्तिम् अनुसृत्य प्रयोजनरूपं परिगृह्यते। स्वप देन 'स्वो ज्ञाता, वात्मनि स्वं, त्रिष्वात्मीये, स्वोऽस्त्रियां धने' इति अमरकोशात् जीवात्मा, तदीयः पदार्थश्च स्वीक्रियते। एवं च प्राणिवर्गः समस्तोऽपि (स्वभावतः) आत्मा, आत्मीयप्रोज-नसिद्ध्यै प्रयतते इति शीर्षिकायाः अभिप्रायः।

## १.२.स्वार्थस्य अपरिहरणीयता

'प्रयोजनम् अनुद्दिश्य न मन्दोऽपि प्रवर्तते 'इत्यभियुक्तोक्तिश्च।सर्वत्र जगति, भृत्यवर्गात् आरभ्य महाधिकरणिक प्राड्विवाकपर्यन्तं, प्रयोजनम् उद्दिश्यैव सर्वस्य प्रवृत्तिः वर्तते इति सर्वजन- विदितम् इदम् । क्वचित् वैदिककार्ये अग्निष्टोमे 'अस्य यज्ञस्य का दक्षिणा 'इत्यादि प्रथमतः एव सोमप्रवाकेन पृष्टत्वात् ऋत्विजां प्रवृत्तिः प्रयोजनाधीना वर्तते। तथा च सर्वेषां स्वार्थसमीहा स्वभावसिद्धा न्याय्या अनिवार्या च

भवति। अत एव–

**'यदि क्षुण्णः पूर्वैरिति जहति रामस्य चरितं**

**गुणैः एतावद्भिः जगति पुनरन्यो जगति कः ?**' इति मुरारिवाक्यानुसारेण, निखिलकल्याणगुणरत्नाकरस्य श्रीरामचन्द्रस्य गुणगणवर्णनप्रस्तावनायां 'रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता ' इति स्वधर्मरक्षणं, स्वजनरक्षणं च श्लाघ्यत्वेन वाल्मीकिमहर्षिणा वर्णनं स्वारस्येन सङ्गच्छते।

## १.३.स्वार्थातिशयस्य परित्यागः

परन्तु लोके स्वार्थपरता सर्वैः निन्द्यते इति चेत् तत्र हेतुम् उत्पश्यामः । तथाहि - 'अति सर्वत्र वर्जयेत्'इति सामान्यन्यायम् अनुसृत्य सर्वोऽपि पुत्र-मित्र-कलत्र-धन-धान्य-गृहाराम-क्षेत्रादि रूपः प्रयोजनपदार्थः,सर्वेषां यावत् प्रमाणकः प्रत्येकं आवश्यकः, तदतिक्रम्य अधिका या प्रवृत्तिः येषु जनेषु दृश्यते, सा प्रवृत्तिः, तद्वन्तः जनाश्च निन्द्यन्ते। अत एव क्वचित् धनाधिक्यम्, क्वचित् निर्धनत्वम्, च भवतः। 'अहिंसा सत्यम् अस्तेयं...'इत्यादिना प्रोक्ताः समान्यधर्माः यदि सर्वेषु जनेषु वर्तेरन्, सर्वत्र धनादिकं व्यापृतं व्यासक्तं सत् अनिन्द्यं श्लाघ्यं च भवेत्। यथा देहादिषु अभिमानः जन्मान्तरवासनया जननकालात् आरभ्य वर्तते, तथा कामक्रोधादिषु अपि पुत्र-मित्र- कलत्रादिदेशपर्यन्तं समस्तवस्तुषु अपि च जायते एव। अन्यथा भारतदेशे भारतीयानां स्वतन्त्रराज्य-स्वीकरणार्थं षष्टिवार्षिकपरिमाणा उद्वेल्लितप्रवृत्तिः सार्वजनीना कथम् आदृता भवेत्। अतः सर्वजन्तुषु नानाविधाः अभिमानाः स्वभावतः उत्पन्नाः वर्तन्ते।

## १.४.सर्वजनहितस्वार्थस्य आवश्यकता

परन्तु मनुष्याः विवेकतः तेषां हेयोपादेयतां ज्ञात्वा सर्वेषाम् अविरोधेन स्वीकर्तव्यान् अभि मानान् ऊरीकृत्य, अवश्यं परित्याज्यान् दुरभिमानान् संत्यज्य, भरणपर्यवसायिनीम् अत्याशां दूरीकृत्य,दया-दाक्षिण्य-दान-अहिंसा-समत्वादिदिव्यगुणादिकं श्रेयस्करं, सर्वजनहितकरं, सर्वश्लाघ्यताप्रदं, स्वीकृत्य, देशदेशीयभाषादिषु प्रत्येकभिन्नभिन्नाभिप्रायवताम् अपि कर्तव्य-अकर्तव्यविषय-विवेकज्ञानेन वयं सर्वे भारतीयाः (भारतदेशस्य जनन-मरण-धर्मकाः) अस्मदीयः अयं भारतदेशः इत्यादि प्रसृ- मराभिमानेनैव संयुक्ताः सर्वे अपि वर्तेरन् भारतीयाः। तद्विषये स्वयं तीव्रश्च यत्नः अपि विधातव्यः अन्यैश्च कारयितव्यश्च।

## १.५.उपसंहारः

भारतदेशीय-पारमार्थिक-देहविमुक्तिम् अधिकृत्य सर्वतन्त्रस्वतन्त्राः श्रीमत्परमहंस -परिव्राजकादिबिरुदाङ्किताः आदिशङ्करभगवत्पादाः उपदिशन्ति -

**'इतः कोन्वस्ति मूढात्मा, यस्तु स्वार्थं प्रमाद्यति।**
**दुर्लभं मानुषं देहम् , प्राप्य तत्रापि दुर्लभम्।। इति।।'**

एतेन स्वार्थप्रणवता अनिन्द्यकोटौ एव प्रवेशिता इति ज्ञायते। सर्वास्वपि वनस्थलीषु सर्वेषु खण्डा न्तरेषु च वर्तमानानां जनानां सर्वेषां अभिमानाः स्वार्थाः अनिवार्याः वर्तन्ते एव। यतः प्रतिदिनं दिन पत्रिकासु तत्तत् स्थलेषु तत्तद्वर्गीयाः स्वेषां स्वातन्त्र्यादिप्रयोजनं प्राप्तुं निरन्तरं प्रयतन्ते इति। अतः स्वार्थसमीहा न्याय्या सर्वजनहिता परिमिता च भवेत् ।

**स्वावलोकनप्रश्नाः**

१.स्वार्थसमीहा कीदृशी भवेत् ?

२.स्वार्थपरता सर्वैः निन्द्यते - किमर्थम् ?

# उपायेन हि यच्छक्यंन तच्छक्यं पराक्रमैः

**संरचना**

२.०. शीर्षिकायाः अर्थः
२.१ शीर्षिकायाः अभिप्रायः
२.२.शीर्षिकायाः उदाहरणभूता कथा
२.२.१.भोजः - प्रशंसा
२.२..२.भोजः - द्यूतासक्तता
२.२.३.उपायचिन्तनाय कालिदासं प्रति देव्याः विज्ञापनम्
२.२.४.भोज-कालिदासयोः सम्भाषणम्
२.२.५.गृहं प्रति भोजस्य निवर्तनम्
२.३.उपसंहारः

## २.०. शीर्षिकायाः अर्थः

उपायेन = युक्त्या; यत् = यत् कर्म ; शक्यम् = निर्वर्तयितुम् अर्हम्, अथवा योग्यम् ; तत् = तत् (एव) कर्म; पराक्रमैः = भुजबलेन, शारीरकदार्ढ्येन वा ; न शक्यम् = न साधयितुं शक्यम् ; हि = खलु ; इति शीर्षिकायाः अर्थः।

## २.१ शीर्षिकायाः अभिप्रायः

उपाये = अधिगते (पुरुषे) सति यत् न शक्यम्,तत् पराक्रमैः न शक्यं हि। यद्वा उपायेन = अधिगतेन येन (पुरुषेण) यत् शक्यम्,न, तत्,पराक्रमैः शक्यं हि। अत्र उपायो नाम धनागमः। प्रथमान्वये, धनसाध्यं कर्म पराक्रमसाध्यं न भवति इति अर्थः। द्वितीयान्वये तु,पराक्रमिणाम् अपि असाध्यं कर्म धनिनः साधयितुम् अलं भवति इत्यर्थः। अर्थस्य एव अर्थसाधने परार्थ्यता प्रति- पाद्यते। अतः द्वितीयः एव अन्वयः साधीयान् प्रतिभाति। तस्यैव वक्तृविवक्षापेक्षितत्वात्।

न खलु लोके अर्थवताम् अर्थसाधनवत् पराक्रमवतां तत् इत्यस्य अन्वयव्यतिरेकाभ्यां समर्थनाय सन्ति बहूनि उदाहरणानि। यथा –

**'यस्यास्ति वित्तं स नरः कुलीनः'**

**'बुभुक्षितैः व्याकरणं न भुज्यते, पिपासुभिः काव्यरसो न पीयते ।**

न विद्यया केनिचित् उद्धृतं कुलम्,हिरण्यमेव आर्जय निष्फलाः कलाः'इत्यादीनि निर्धनपुरुषः तृणसमानः। 'तृणात् लघुतरः तूलः, तूलादपि च याचकः ' इत्यादीनि च। अन्यथा अपि शीर्षिकायाः अभिप्रायः वर्ण्यते यथा-उपाये कार्यसाधनकौशले सति (युक्तौ सत्याम्) यत् न शक्यं तत् पराक्रमैः न शक्यं हि इति। नोचेत् उपायेन कौशलेन अथवा नैपुण्येन यत् शक्यते न तत् पराक्रमैः अशक्यं हि इति। अत्रापि पूर्ववत् द्वितीयः एव अन्वयः स्वरसिकतया स्वीकार्यः।

## २.२.शीर्षिकायाः उदाहरणभूता कथा

### २.२.१ उपायचिन्तनाय कालिदासं प्रति देव्याः विज्ञापनम्

अस्मिन् अर्थे काचन कथा उदाह्रियते यथा-अस्ति खलु महाकविः रसज्ञशेखरः परं कालिदासस्य मित्रं, पोषकश्च, राजा भोजः नाम। यस्य हि कीर्तिः अभिष्टुता कालिदासेनैव महाकविना 'निरालम्बा सरस्वती, भोजराजे दिवङ्गते ' इति।

सः कदाचित् द्यूतासक्तचित्तः देवीं विमनायिताम् अतानीत्। यदा तावत् राजा बहुभिः आकारितः अपि न सस्मान आत्मीयम् अवरोधम्। देवी कालिदासम् अयाचत - 'भवानेन यथाकथमपि महाराज-आनयने अलम्' इति।

### २.२.२.भोज-कालिदासयोः सम्भाषणम्

सः भिक्षुरूपी कविचन्द्रः राजानम् अभ्येत्य अदृश्यत मांसखण्डधारिणा हस्तेन। राजा तु विस्मितः अन्वयुक्त (अपृच्छत्)–'यतिसार्वभौम ! अपि इदं युक्तं यत् भवादृशेन मांसं निषेव्यते ?' इति। कालिदासः तदा ब्रूते 'राजन् ! किमाह भवान् ,असति मद्ये किम् नाम उपलब्धेनापि एतेन मांसखण्डेन ?' इति। राजा तु–मदिरा अपि ते प्रिया...? इति। तदा परिव्राजकेन आलोचितम् एवं समाधत्त। 'सति हि वाराङ्गनाजने मदिरास्वादस्य पराकाष्ठा' इति।ततो भोजः अनुयुक्तवान् –'च खलु ते कुतोऽपि धनार्जनं घटते ? इति। 'अस्ति खलु चौर्यं अथवा द्यूतकला तत्साधनम्' इति पराशरः आह।

ततः अद्भुत-आक्रान्त-स्वान्तः नरपतिः अप्राक्षीत्- 'मस्करिन्।चौर्यद्यूतयोरपि ते परिश्रमो वर्तते वा' इति। कर्मन्दी तु –'प्रभो ! भ्रष्टस्य नैकथा हि गतिः भवति किं तत्राश्चर्यम्' इति झटिति समाहितवान्।

### २.२.३.गृहं प्रति भोजस्य निवर्तनम्

भूपतिः परं लज्जितः तेन समाधानेन।भिक्षुं तं प्रणम्य, अञ्जसा अन्तःपुरम् अगात्। अयम् अत्र सङ्ग्रहः -

**'भिक्षो ! मांसनिषेवणं किम् उचितम् ? किं तेन मद्यं विना,**
**मद्यं चापि तव प्रियम् ? प्रियम् अहो वाराङ्गनाभिस्सह।**
**वारस्त्रीरतये कुतः तव धनम् ? चैर्येण द्यूतेन वा,**
**चैर्य-द्यूत-परिश्रमः अस्ति भवतः ? भ्रष्टस्य का वा गतिः' इति**

### २.३.उपसंहारः

अनया कथया भिक्षोः राज-आनयनैपुण्यम् उपदर्शितम् इति उपायः सर्वार्थता-समृत्कृष्टये भवेत् इति प्रकृतवाक्यसमर्थनम्।

**स्वावलोकनप्रश्नाः**

१.शीर्षिकायाः, आहत्य चत्वारः अर्थाः दत्ताः - ते के ?

२.भोजः कथम्/किमर्थं अन्तःपुरं प्रति निवृत्तः?

# ३.यत्ने कृते यदि न सिध्यति कोऽत्र दोषः

**संरचना**

३.०. शीर्षिकायाः अर्थः
३.१ शीर्षिकायाः अभिप्रायः
३.२.प्रयत्नशीलतायाः आवश्यकता
३.२.१क्रियाशीलकतायाः अवसरः
३.२.२.कर्तव्यतायाः अनुष्ठानम्
३.२.३.एतदर्थसम्पादकाः कथाः
३.३.उपसंहारः

## ३.०. शीर्षिकायाः अर्थः

यत्ने = प्रयत्ने; कृते = आचरिते, अनुष्ठिते अपि; न सिध्यति = कार्यं सुसम्पन्नं न भवति,सुसाधितं न भवति; यदि= तर्हि; अत्र= कार्यस्य सम्पन्नतायाः असाधने; दोषः = अपराधः; कः = कः भवति इति शीर्षिकायाः अर्थः।

## ३.१. शीर्षिकायाः अभिप्रायः

सर्वस्यापि लोकस्य व्यवहारः यत्किञ्चित् प्रयोजनम् उद्दिश्यैव भवति। मन्दः अपि विना प्रयोजनं स्वकार्ये न प्रवर्तते। प्रयोजनं नाम कार्यस्य फलसिद्धिः।सिद्धेः साधनस्य कार्यकारणरूप- सम्बन्धः विद्यते।साधन-सेकरण-प्रभृति कार्यसिद्धिपर्यन्तं क्रियमाणः व्यवहारः एव प्रयत्नः इति उच्यते। सः एव प्रयोजन-अपरपर्यायः। एवं प्रयत्ने क्रियमाणे अपि ,यदि फलसिद्धिः न भवति तत्र प्रयत्नलोपप्रयुक्तः पुरुषस्य दोषः किमपि न भवति इति शीर्षिकायाः अभिप्रायः।

## ३.२.प्रयत्नशीलतायाः आवश्यकता

कार्यसिद्धये प्रयत्नः अवश्यं करणीयः भवति। प्रयत्नशीलः हि पुरुषः उद्योगी इति व्यव- ह्रियते। तादृशम् उद्योगिनं पुरुषसिंहं लक्ष्मीः स्वयम् उपैति। उद्योगशब्दस्य उद्यमः इति अर्थः। उद्यमेन हि कार्याणि सिध्यन्ति,न केवलं मनोरथैः। कुम्भिकुम्भ-

विदलन-पटोरपि केसरिणिः सुप्तस्य मुखे स्वयम् आगत्य मृगाः न प्रविशन्ति। अतः कार्यसिद्धम् इच्छता पुरुषेण अवश्यं प्रयत्नशीलेन भवितव्यम्। 'न हि कश्चित् क्षणमपि जातु तिष्ठति अकर्मकृत्' इति गीतावचनेन सर्वेऽपि सततं यत्किञ्चित् कार्यनिर्वहणपराः भवन्ति इति ज्ञायते।यदि अस्माकम् उद्यमः केवलम् उदरपोषणादि- स्वार्थम् उद्दिश्य प्रवर्तते, तदा तादृशम् उद्यमं, सन्तः न अभिनन्दन्ति। परोपकारं देशाभिवृद्धिं समाजक्षेमं विश्वकल्याणं वा मनसि निधाय उद्यमः क्रियते यदि तदा तादृशोद्यमस्य सन्तः न केवलं वाचा, किन्तु कर्मणापि सहायम् आचरन्ति।

## ३.३.क्रियाशीलकतायाः अवसरः

भारतभूमेः एव कर्मभूमित्वात् तत्रत्यानां कर्मपरतन्त्रत्वं सर्वलोक-सुख-अवाप्तये भवति। कर्तव्यः नैकविधः। मातापित्रोः पुत्रं प्रति, पुत्रस्य मातापितरौ उद्दिश्य, राज्ञः प्रजाः प्रति, प्रजानान्तु राजानं प्रति, विध्युक्तकर्म-कर्तव्यनिर्वहणं विद्यते एव। श्रुति-स्मृति-सदाचार-प्रमाणमूलम् एव भारतीयानां कर्मणः वैशिष्ट्यम्।

## ३.४.कर्तव्यतायाः अनुष्ठानम्

मनुष्यस्य कर्मबाहुल्यम् एव तदीययत्नबाहुल्यम् उद्घोषयति। कर्तव्यपालनेनैव कार्यसिद्धिः भविष्यति। कर्तव्यनिर्वहणे निद्रातन्द्रादिकं परिहार्यं भवति। कर्तव्यं कर्म येन न क्रियते सः सतां मन्यवे कल्पेत। अतः पुरुषेण प्रयत्नशीलेन, जागरूकेण, कार्यदक्षेण भवितव्यम्। चातुर्वर्ण्यस्य यजन-याजनादिकं कर्मजातं निर्दिष्टं वर्तते।

## ३.५.एतदर्थसम्पादकाः कथाः

कृषीवलः क्षेत्रं हलेन कर्षति। क्षेत्रात् पाषाणादीन् अपसारयति। क्षेत्रं सिञ्चति। बीजं वपति। सस्यापकृद्भ्यः रक्षां करोति। अत एव च सः फलभाग्भवति। कर्तव्यानां मध्ये यस्य कस्यचित् लोपे पूर्णफलं न साधयति। अतिवृष्टि-अनावृष्ट्यादि-प्रकृति-वैपरीत्ये सम्भवति सति कृषीवलस्य प्रयत्नः विफलः भवति। परन्तु न तत्र कृषीवलस्य दोषः, किन्तु प्रतिकूलवर्तिनो दैवस्य। अत एव कृषीवलाः कृषिं नैरन्तर्येण कुर्वन्ति। सफलाः भवन्ति। अत एव उक्तं 'कृषितो नास्ति दुर्भिक्षम् 'इति। अपरं च धर्मपुत्रः युधिष्ठिरः स्वस्य भ्रातृजनस्य च ग्रासवासोऽर्थं, सर्व- विध्वंसकर-युद्धनिवारणाय एव पञ्चग्रामदान-परिमिताम् अभ्यर्थनां कुरुसभायां भगवतः श्रीकृष्णस्य मुखात् कारयामास। परहिंसा-रिरंसवः सुयोधनाद्याः ताम् अल्पीयसीम् अभ्यर्थानां निराचक्रुः।

## ३.३.उपसंहारः

एवं च कृतप्रयत्ने धर्मिष्ठे युधिष्ठिरेवा सततम् उद्यमम् कुर्वति कृषीवले वा कञ्चन दोषं न पश्यामः। अत एव उक्तं 'यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः' इति।

**स्वावलोकनप्रश्नाः**

१.कार्याणि केन सिध्यन्ति - तत्र उदाहरणं किम् ?

२.यत्ने कृते यदि न सिद्ध्यति, तत्र दोषः अस्ति वा, नास्ति वा ?

# ४.मित्रद्रोहे च पातकम्

**संरचना**

४.०.शीर्षिकायाः अर्थः

४.१.शीर्षिकायाः अभिप्रायः

४.२.मैत्रीप्रामुख्यम्

४.३.दुष्टमैत्रीप्रभावः

४.४.मैत्रीसमयोरेव शोभते

४.५.उपसंहारः

## ४.०. शीर्षिकायाः अर्थः

मित्रद्रोहे, मित्रस्य = सुहृदः; द्रोहे = महति अपकारे चिन्तिते; च = तु, मात्रम्; पातकम् = महत्पापं; सम्भवति इति शीर्षिकायाः अर्थः।

## ४.१ शीर्षिकायाः अभिप्रायः

मेद्यति स्निह्यतीति मित्रम् । ञि मिदा-स्नेहने इत्यस्माद्धातोः निष्पन्नमिदं पदम्। मित्रं सखा वयस्यः सुहृत् इति अनर्थान्तराणि पदानि।लोके प्राणिनां मित्रसमं वस्तु नास्ति इत्युक्तिः न अतिशयोक्तिः। असम्पत्तौ उपकारी, गुह्यविषयकथनार्हः,आपद्रक्षकश्च भवति सखा। सः एव सदा अस्माकं कल्याणकाङ्क्षी, न तु अन्यः। तादृशमित्रम् उद्दिश्य द्रोहचिन्तनम् अतीव पातकम् इति आमनन्ति वृद्धाः।

## ४.२.मैत्रीप्रामुख्यम्

मित्रस्वरूप-स्वभाव-परिशीलनेन इदं सत्यम् एव इति स्फुटीभवति। तथाहि - राजा अस्मान् अनुशास्ति एव। परं न अनुनयति। भार्या केवलम् अनुनयति, न तु शास्ति। मित्रं तु उभयथा प्रवर्तते। किञ्च अवसरम् अनुसृत्य लालयति, दण्डयति, संस्कुरुते च सः। मैत्री हि आहारदानात् पक्षिणां, भयात् लोभात् च मूर्खाणाम्, दर्शनात् एव सतां सम्पद्यते। किञ्च सतां विषये सप्तसु एव पदेषु मैत्री सिध्यति। अत एव 'साप्तपदीनं सख्यम् ' इत्युच्यते। सा च मैत्री समानशीलव्यसनेषु बहुलं दृश्यते। असदृशेषु तु नैव स्नेहः। न हि तैल-सिकतयोः मेलनं कदापि सम्भवति। एवं सति समानवयस्कं सुगुणोपेतं सहृदयं मित्रं वृणृयात्। एतादृशं सन्मित्रदर्शनं दिने दिने अभिनवम्

इव शोभते। तद्दर्शनेन समुपजातं सुखम् अनुपमं भवति। सागरः सर्वरत्नैः सम्पूर्णः अपि प्रतिदिनं चन्द्रोदयम् अभिलषत्येव। अत एव हेतोः अपि सर्वसम्पत्समृद्धैः अपि नरैः सुहृत्- सम्पादनम् अवश्यकर्तव्यम् एव इति प्रतिभाति। समुपस्थिते च व्यसने, वाङ्मात्रेणापि साहाय्यं मित्रात् अन्यः न कुरुते इत्यत्र न विवादः।

## ४.३.दुष्टमैत्रीप्रभावः

दुर्जनं दूरतो वर्जयेत्। तस्य सङ्गतिवशात् निर्लिप्तः अपि जनः सकालापदां भाजनं भवति। किञ्च मुर्खः मृद्धटः इव दुर्भेद्यः, सुसन्धानः। अतः सुजनमैत्री कर्तव्या। एषा पूर्वाह्ण- छाया इव क्रम-अभिवृद्धिम् आप्नोति। आपत्-काले यः सखा भवति सः एव निस्स्वार्थसखः। तादृशमित्रसम्पदेव सम्पद्, न तु रत्नादिसम्पत् । सत्-मित्रवन्तं श्रीः स्वयमेव वृणोति। अतः एव दरिद्रः अपि मित्रवान् सकलाश्च आपदः सुखेन तरति। सर्वाण्यपि कार्याणि साधयति। दाशरथिः श्रीरामः सुग्रीवादि-सन्मित्रमण्डल-उपेतः सकल-लोकरावणं पौलस्त्यम् अवधीत् किल। मित्रं, रजतं, सुवर्णं, बुद्धिश्चेति चत्वारि भाग्यकारणानि इति बृहस्पतिः अपि अब्रवीत्। तत्रपि ऐहिक- आमुष्मिक-मङ्गल-साधकत्वात् सखैव सर्वाधिको भवति।

## ४.४.मैत्रीसमयोरेव शोभते

मित्रेण तावत् समवयस्केन भाव्यम् इति वयस्यः इति पदमेव ज्ञापयति। वयसा तुल्यः वयस्यः इति हि तदर्थः। किञ्च समानशीलेन भाव्यम् इति पूर्वमेव उक्तम्। न हि सधन-निर्धनयोः वेदान्तवित्-मूर्खयोः, शान्त-क्रूरचित्तयोः वीर-भीर्वोः वा मैत्री सङ्घटते। नीचेन अधिकेन वा स्नेहो न कर्तव्यः। अनुभूयते खलु खट्वायाः मत्कुणसङ्गत्या दण्डताडनम्। क्षीरस्य वह्निसाङ्गत्या क्षीणता ।

## ४.५.उपसंहारः

एवं मैत्री धियः जाड्यं परिहरति। वाचि सत्यं सिञ्चति। मानोन्नतिं दिशति। पापम् उदुरालोचनाम् अपाकरोति। सवयस्कं मित्रं प्राप्नुयात्। जीवनं सुगमं कुर्यात्।

*निबन्धः*

**स्वावलोकनप्रश्नाः**

१.'असदृशेषु तु नैव स्नेहः' किमर्थम् ?

२.सज्जनमैत्र्याः प्रभावः कीदृशः भवति ?

३.दुर्जनमैत्र्याः प्रभावः कीदृशः भवति ?

# ५.सहसा विदधीत न क्रियाम्

**संरचना**

५.०. शीर्षिकायाः अर्थः

५.१. शीर्षिकायाः अभिप्रायः

५.२. उदाहरणभूता कथा

५.३. विवेचनस्य आवश्यकता

५.४. अविमृश्यकारितायाः अन्यत् उदन्तम्

५.५. उपसंहारः

## ५.०. शीर्षिकायाः अर्थः

सहसा = तत्-क्षणम् एव, बुद्धौ आलोचनायाः आगमन-अनुपदमेव, आनालोच्य; क्रियाम् = कर्म; न विदधीत = न आचरेत्; इति शीर्षिकायाः अर्थः।

## ५.१ शीर्षिकायाः अभिप्रायः

लोके यः कोऽपि यत् किमपि कर्म सहसा, विवेचनम् अकृत्वा, त्वरया, न कुर्यात्। अविवेकः परम् आपदां पदम्, अविवेकः परं, विवेचनविरहे एव, त्वरया कर्मकरणे प्रवर्तनद्वारा, आपदाम् = बहूनां कष्टानाम्, पदम् = कारणं भवति। यद्वा, परमापदाम्उ महतां कष्टानाम् , पदम् = कारणं भवति। अथवा आपदाम्, परं पदम् = प्रधानं कारणम्, वा भवति इति शीर्षिकायाः अभिप्रायः।

## ५.२.उदाहरणात्मिका कथा

अत्र निदर्शनं प्रसिद्धा ब्राह्मणी-नकुलकथा। ब्राह्मणी काचित् स्वगृहे नकुलम् एकं पुपोष। सा कदाचित् सुप्तं स्वशिशुं शय्यायां शाययित्वा स्नातुं नदीं जगाम। तदा कश्चन सर्पः शिशु- शयन-समीपम् आगच्छत्। नकुलः तं दृष्टवा द्रुतम् अभिपत्य फणिनं बहुधा खण्डयित्वा मारया- मास। आत्मना कृतम् इदं शिशु-रक्षण-कर्म सद्यः एव ब्राह्मण्यै ज्ञापयितुकामः सः सर्प-शोणित -रूषितेन एव मुखेन नद्यां ब्राह्मणी यत्र अवर्तत, तत्र अधावत्। आर्द्ररक्तमुखं तं पश्यन्ती सा 'शिशुम् एव दष्ट्वा अयं हिंसितवान्। तस्यैव रक्तं अस्य मुखे दृश्यते' इति भ्रान्त्या तं तदैव, तत्रैव, शिलाप्रहारैः व्यापादयामास। अथ सा गृहम् आगत्य यदा पश्यति, तदा प्रबुद्धः उत्तानशयः शिशुः

हस्तपादं विधून्वन् हासविकासिना वदनेन आत्मनः प्रहर्षं प्रकाशयन् विललास। शय्या-समीपे सर्पशरीरखण्डाश्च अदृश्यन्त। सपदि सा आत्मनः असमीक्ष्यकारितां जानाना भृशम् अनु- अतप्यत। 'अहो ! बत ! आत्मना पोषितं, आशीविषं हत्वा शिशुं रक्षितवन्तं महोपकारिणं नकुलं अनालोच्य अवधिषम्' इति अतिमात्रम् अन्वशोचत्।

## ५.३.विवेचनस्य आवश्यकता

नकुलस्य मुखे असृक्-दर्शन-अनन्तरं 'कस्य इदं रक्तं अस्य मुखे दृश्यते ? किं शिशोः अथवा अन्यस्य कस्याचित् प्राणिनः ? गृहं गत्वा पश्मामि। ततः निर्णयो भवेत्। यदि शिशोः एव इदं रक्तं,तर्हि, तं दष्टवान्,अयं दुष्टो नकुलः इति हन्तव्यः' इत्येवं यदि सा पर्यालोचनंकृतवती अभविष्यत् तर्हि स्वेन वर्धितस्य उपकर्तुश्च नकुलस्य वधः,तेन महान् अनुतापश्च तस्या न अभविष्यत्।

## ५.४.अविमृश्यकारितायाः अन्यत् उदन्तम्

इदम् अन्यत् अभिनवं निदर्शनम्। गृहिणं गोपालमिश्रम् अभिगम्य कश्चित् अवोचत्-अनन्तरवीथ्यां महान् कोलाहलः। बालानां युद्धं प्रवृद्धम्, वृद्धानां युद्धे पर्यवसितम् अभूत्। तत्र एकस्यां कक्ष्यायां धुरन्धरः भवत् -पुत्रो बहुभानुः इति। शमप्रधानो गोपालमिश्रः तदाकर्ण्य न परं विषण्णः अभवत्, किन्तु पुत्रं प्रति अतिमात्रं क्रुद्धः अभवत्। तस्मिन्नेव क्षणे गृहस्य अन्तः प्रविशतः पुत्रस्य दक्षिणे कपोले बलवतीं चपेटां ददौ।

अतर्कित-पतितं तं गाढप्रहारं असहमानः बहुभानुः 'हा' इति आक्रुश्य भूमौ पतितः निष्प्रज्ञः अशेत। तम् आक्रोशं श्रुत्वा, तत्र आगता एकपुत्रा तदीया जननी तदवस्थं तं दृष्ट्वा मृतमेव मन्यमाना, दुस्सहत्वात् तस्य दुखस्य स्वयमपि मर्तुकामा द्रुतपदं धावित्वा कूपे पपात। बहुभिः शैत्य-उपचारैः चिरेण प्रत्यागतप्रज्ञो बहुभानुः शनैः उत्तस्थौ। परन्तु तस्य दक्षिणाक्षिणाक्षिगोलकं प्रहारवेगेन बहिरागतं दर्शनशक्तिशून्यं तदीयां मुखशोभां अतीव विकलाम् अकरोत्। विकृतमुखः सः काणः बभूव। तस्य माता अपि कूपात् कथञ्चित् उद्धृता प्रत्यापन्नजीविता पातन-अभिघात -जनितस्य शिरो-व्रणस्य वेदनां चिरम् अनुबभूव।

## ५.५.उपसंहारः

गोपालमिश्रश्च, वीथ्यन्तरवृत्तस्य युद्धस्य स्वपुत्रस्य च न कश्चित् सम्बन्धः इति, तस्मिन् समये सः सन्निहितं ग्रामान्तरवर्तिनं सुहृदं द्रष्टुं गतः, तत्रैव स्थितः, ततः प्रत्यागतः, इति च तत्त्वं जानन्, भ्रान्तस्य कस्यचित् वचनश्रवणमात्रेण उपनिपतितां आत्मनः अविमृश्यकारितां विचिन्त्य चिरं बाधातप्तचेताः अभवत्। अतः युधिष्ठिरमुखेन महाकविः भरविः आह -

**सहसा विदधीत न क्रियाम्, अविवेकः परम् आपदां पदम्।**
**वृणुते हि विमृश्यकारिणम्, गुणलुब्धाः स्वयमेव सम्पदः।।**

**स्वावलोकनप्रश्नाः**

१.'अविवेकः परमापदां पदम् ' अत्र अर्थद्वयं कीदृशम् ?

२.ब्राह्मण्याः अविवेकः कीदृशः भवति ?

३.गोपालमिश्रस्य अनालोच्य कार्यकरणं कीदृशम् ?

# ६. न युक्तं कूपखननं सन्दीप्ते वह्निना गृहे

**संरचना**

६.०. शीर्षिकायाः अर्थः

६.१. शीर्षिकायाः अभिप्रायः

६.२.आलोचनात्मकं प्रस्तावनम्

६.३.समयस्फूर्तिः (Timely-Action) सामयिकं जागरणम्

६.४.सूक्तेः अस्याः सार्वत्रिकता

६.५.उपसंहारः

## ६.०. शीर्षिकायाः अर्थः

गृहे = निवासमन्दिरे; वह्निना = अग्निना; सन्दीप्ते = प्रदग्धे सति; कूपखननम्, कूपस्य = वाप्याः; खननम् = अवदारणम्; न युक्तम् = अयोग्यं भवति, इति शीर्षिकायाः अर्थः।

## ६.१ शीर्षिकायाः अभिप्रायः

मानवः, जीवने सर्वदा जागरूकः भवेत्। कष्टेषु अप्रमत्तः स्यात्। तेन विपदाम् आदौ एव प्रतिक्रिया चिन्तनीया भवति। कष्टेषु निमग्नः निवारणोपायान् स्वीकर्तुं असमर्थः भवति। स्वीकृतः अपि तेषां प्रभावः कार्यकारी न भवति। कष्टानां दूरीकरणाय पूर्वसन्नाहः आवश्यकः। अथवा समयस्फूर्तिः वा सामयिकं जागरणम् अपि वा आवश्यकं भवति इति शीर्षिकायाः अभिप्रायः।

## ६.२.आलोचनात्मकं प्रस्तावनम्

लोकव्यवहारे बहूनां सूक्तिरत्नानां प्रचारः प्रसारश्च भृशं दृश्यते। परन्तु पृथिव्यां वर्तमानानां अस्मादृशां तदुपादानं परीक्ष्यैव कर्तव्यम्। रत्नानां सङ्ग्रहं न कोऽपि आक्षिपति। अपि तु कर्तव्या परीक्षा। रत्नहारी तु पार्थिवः अपरीक्ष्य अविमृश्य वा गृह्णन् वञ्चितः भवेत् इत्याशङ्का जागर्ति एव। परीक्षा पुनः देशकालस्थितिगतीः अनुरुध्य कार्या। तत्परीक्षायां प्रवृत्तायां रत्नानां तदाभासानाम्, अथ रत्नानाम् अपि वा मध्ये उत्कर्ष-अपकर्ष-निष्कर्षे अधिकारि- तारतम्येन परिग्रहः सम्भवति। किञ्च लोकव्यवहाराय प्रवृत्ति-निवृत्ती अत्यन्तम् अपेक्षिते।इष्टे प्रवृत्तिः अनिष्ठात् निवृत्तिः

इति अस्ति लोके रीतिः। तदर्थे विविधाः धर्माः, नानाशास्त्राणि, बहूनि सुभाषितानि च प्रवर्तन्ते। श्रुतयः स्मृतयो वा, पुराणानि चरितानि वा सर्वाण्यपि सुभाषितानामेव स्वभाव-अनुभावादिसिद्धानां रूपान्तराणि।अतः एषां तादृशानां वा प्रभावः जनमनस्सु वरीवर्ति। एवं विधि-निषेधात्मकानां सुभाषितानां लोकस्थितेः अनुकूलायां प्रवृत्तौ एव तात्पर्यम्।अन्ततो गत्वा,विधि- रूपम् प्रत्यक्षतः प्रवर्तकम् चेत्, निषेधात्मकम् अनिष्टात् निवृत्तिम् सम्पाद्य, विधिप्रवृत्तेः आनुकूल्यं सम्पादयति। अतः कथञ्चित् निषेधात्मकानाम् अपि पर्यालोचनम् आवश्यकमेव।

## ६.३.समयस्फूर्तिः - सामयिकं जागरणम्

इदं सुभाषितम्, व्यर्थप्रयत्ने प्रवृत्तस्य निवर्तनपरम्। गृहदाहे सम्भवति तत्-क्षणकर्तव्यः तच्छमोपायः,नो चेत् स एव अग्निः निकटस्थान्यपि गृहाणि दग्धुं प्रवर्तते। गृहे लग्नस्य आशुक्षणे प्रशमने मृद्वारिबाष्पप्रयोगादिकं तत्क्षणकर्तव्यं भवति,न तु कूपखननं जलसम्पादनाय युज्यते तदात्वे। तदाह 'न युक्तं कूपखननम्'इति। विलम्बे सति हि सन्दग्धं गृहं गेहपतेः नष्टं कष्टं च जनयति। तथा अन्यगृहस्थान् अपि उपतापयति।अतः सत्वरं कार्यसाधनोपायाश्रयणमेव वरीयः इति सिद्धम्। दह्यमाने गृहे कूपं खनित्वा वारिसम्पादनं, युद्धारम्भे शस्त्राभ्यासं ज्ञापयति। प्रवृत्ते शस्त्रसम्पाते शस्त्राभ्यासं कुर्वन् बालो वा बालिशो वा स्यात् न तु वीरः सुवीरो वा। समयज्ञता-समयस्फूर्तिः- सत्वरप्रवृत्तिश्च इत्येतत्कर्म वीराणां लक्षणम्। समयज्ञो हि तत्समये सिद्धोपायैः कार्यं सम्पा- दयति।न, विलम्ब्य फलप्रदान् उपायान् अनुधावति,न वा कार्यनाशदर्शिनः क्रियाकलापान्। साध्य- साधनप्रसङ्गः हि अव्यवधानम् अपेक्ष्यते। साध्यसाधने उपायस्य आचरणं प्रशस्यते। कार्यसम्पत्तिः कारणकलापस्य विरहं वा, विलम्बं वा न सहते। दग्धे गृहे पश्चात्सम्पादितम् उदकं किमर्थकं स्यात् ? अतः प्रत्युत्पन्नमतिः ब्रूते 'न युक्तं कूपखननं सन्दीप्ते वह्निना गृहे ' इति।

## ६.४.सूक्तेः अस्याः सार्वत्रिकता

पूर्वोक्तं सुभाषितं न केवलं गेहे पर्यवस्यति, अपितु देहे देशे च। नीरोगः दृढगात्रः गृही देशस्य उत्तमनेता स्यात्, अधिनायकश्च स्यात्। नित्यरोगिणः भोगभाग्यादिकं न मुदे, तथा कलहिनः नित्यशङ्कितस्य वा गृहं, गृहं न भवति। किन्तु वनम्। देहस्य रोगः अनलः, गेहस्य कलहः अनलः, देशस्य अन्तःकलहः अनलः। रुग्णस्य शान्तिः अलभ्या। गेहे अधिकप्रजोत्पत्त्या गृहजीवनम् अपि विधुरं भवति। यदि देशे पुनः

अन्तःकलहः जायते तर्हि देशीया अभिवृद्धिः निरुद्धा स्यात्। तृतीयस्य च लाभः भवेत्। सः च अनलविशेषः सिद्धोपायैरेव प्रशाम्यः, न तु साध्योपायैः। कूपखननं विलम्ब्य फलप्रदं साध्योपायं जलसम्पादनं रूपयति, अतः तत् नउपयुज्यते दह्यमाने गृहे।पूर्व सम्पादितेन मृद्-वारि-बाष्पादिना गृहदाहः प्रशाम्येत। अनयैव रीत्या आपत्काले धर्माधर्ममीमांसया वृथा कालयापनं नोपयोगि। आर्तः सन्, आतुरस्सन् वा आपदि यद्यत् करोति तत्-तत् आपद्धर्मत्वेन परिगण्यते। आपद्धर्माणां तथा विविधप्रायश्चित्तानां च प्रसङ्गः अस्मद्- भारतीय-संस्कृतेः अनूचानम् औदार्यं स्मारयति।

## ६.५.उपसंहारः

सत्कार्यसाधनाय सता वा असता वा मार्गेण प्रवर्तन्ते मानवाः। कर्मवीराणां गतिः अन्या- दृशी लोके । आपत्सु विशेषधर्माणाम् उपेक्षा न पापाय भवति। अस्ति तस्यापि प्रायश्चित्तप्रकरणं सामान्यधर्माऽचरणेन सर्वः सम्मान्यते एव। तदेव सामान्यजनानीकस्य श्रेयस्करम्। अतः अरिष्ट- निरसनाय अविलम्ब्य फलप्रदम् उपायम् आश्रयेत्।

**स्वावलोकनप्रश्नाः**

१.'समयज्ञः कथं कार्यं सम्पादयति ?

२.' वह्निना गृहे सन्दीप्ते, कूपखननं न युक्तं ' - किमर्थम् न युक्तम् ?

ཀཀཀ

# ७.धूमशकटसौकर्याणि

**संरचना**

७.०. शीर्षिकाया: अर्थ:
७.१ शीर्षिकाया: अभिप्राय:
७.२.अस्मद्देशे यात-आयातसाधनानि
७.३.धूमशकटयानस्य आविर्भाव:
७.४.धूमशकटयानस्य सौकर्यम्
७.५.आंग्लेयकालीनं धूमशकटयानम्
७.६.आधुनिकं धूमशकटयानम्
७.७.उपसंहार:

## ७.०. शीर्षिकाया: अर्थ:

रैल् (Train) यानं विस्तृतरूपेण धूमं त्यजति खलु। धूमस्य अधिकं विसर्जनं दृष्टौ निधाय, तं यानं धूमशकटम् इति व्यवहृतवन्त:। प्रकृते तस्य धूमशकटस्य प्रयोजनानि कानि सन्ति ? सौकर्याणि कीदृशानि वर्तन्ते ? इति अस्या: शीर्षिकाया: अर्थ:।

## ७.१ शीर्षिकाया: अभिप्राय:

पूर्वम् अस्मद्देशे यात-आयातसाधनानि कीदृशानि ? धूमशकटयानस्य आविर्भावस्य नेपथ्यं किम् , धूमशकटयानस्य प्रयोजनानि, सौकर्यणि च कानि ? आंग्लेयकालीनं धूमशकटयानम्, आधुनिकं धूमशकटयानम् च कीदृशं वर्तते इत्यादिविषयाणां विशदीकरणमेव अस्या: शीर्षिकाया: प्रमुखम् उद्देश्यं भवति।

## ७.२.अस्मद्देशे यातायातसाधनानि

अस्मद्देशे चिरात् मानव: यात-आयातार्थं अनेकानि वाहनानि उपयुङ्क्ते स्म। प्रथमत: स: बलीवर्दान्, गर्दभान्, करिण:, अश्वान्, वा आरुह्य यातायाते कुर्वन्नासीत्। तदनन्तरं तानेव शकटे नियोज्य सपरिवारं गन्तुं प्रावर्तत। भारतदेशे इत्थम्भूते यातायातसाधने पश्चिमदेशेषु जार्जस्पी- रेन्सन् इति कश्चित् वैज्ञानिक: बाष्पशक्तिं अन्विष्य अजानात्।

## ७.३.धूमशकटयानस्य आविर्भावः

भारतदेशे आग्लेयस्वायत्तशासने दृढीभूते निजवस्तुस्तोमं निनीषवः सन्तः ते अत्र धूमश- कटं समचालयन्। तेनैव शकटेन आत्मीयानां सोल्लासं सत्वरं च यात-आयाते वाञ्छन्तः ते , एतदर्थाः अपवरकरूपाः पेटिकाः उदपादयन्। अनन्तरं च एतत् शकटसंचालनकार्यनिर्वाहव्ययं सिसाधयिषवः एव ते अस्मद्-देशीयानाम् अपि तद्-द्वारा यात्रां कर्तुं स्थानं तृतीयश्रेणीरूपम् आराधयन्। अत एव तदात्वे अस्मदीयानां यात्रापेटिका (अपवरकः) तदितरयानापेक्षया सर्वथा उपवेशमात्रार्हा च तैः संकलिता। इत्थं भारतदेशे धूमशकटयानं समजायत।

## ७.४.धूमशकटयानस्य सौकर्यम्

अस्य यानस्य प्रवेशनेन अस्मद्-देशीयानाम् अत्यधिकं सौकर्यम् उदभूत्। इतरयानापेक्षया अस्मिन् सौविध्यानि अधिकानि सन्ति। अस्मिन् याने वयं समस्त-परिवार-सहिताः गृहे इव सुखं उपविशन्तः सन्तः यात्रां कर्तुं प्रभवामः। अन्यच्च, पेटिकान्तः एव इतस्ततः सञ्चारोऽपि कर्तुं शक्यते। अपि च, अस्य अतिसत्वरसाधनेन एतदतिरिक्त-यानापेक्षया द्रुततरं निर्दिष्टस्थानं प्राप्नुयाम। अपरं च अनेके परिवाराः एकदैव यात्रां कर्तुं प्रभावन्ति। किं बहुना, सानन्दं सुप्ताः सन्तः एव गन्तुं शक्नुमः।

## ७.५.आंग्लेयकालीनं धूमशकटयानम्

इदम्-प्रथमतः एव आंग्लेयाः भारतदेशे समचालयन्। अतः एव अस्मिन् यावन्ति उच्च- श्रेणीषु तदीयेभ्यः सौकर्याणि सम्पादितानि, तावन्ति निम्नश्रेण्याः सम्पादयितुं तैः मनसापि न विचारितम्।प्रथम-द्वितीय-श्रेण्योःतु तदीयार्थे विविधानि सौविध्यानि असाधिषत इति कथा। तृतीय- श्रेण्यां तु यातुम् अस्मदर्थं वस्तु-वाहक-पेटिकावत् निरवधिकतया यात्रिणः समवाह्यन्तः तत्र च उपवेशनस्य का वार्ता, तिष्ठतोऽपि यात्रा कष्टसाध्या अवर्तत। एवञ्च अस्मदीयान् जडवस्तुजातमिव संवाह्य अपरिमित धनार्जनमेव तेषाम् अभिमतम् आसीत्। अस्मादेव कारणात् प्रथम-द्वितीय-श्रेण्योः आंग्लेयाः एव प्रवेशम् अर्हन्ति स्म। तत्र कयाऽपि विधया भारतीयानां प्रवेशः नानुमन्येत इति अस्माकम् अवमानकरः नियमः अपि तैः निरधारि।यथा गच्छता कालेन यदा स्वात- न्त्र्यसंग्रामः सबलः अभूत् तदा प्रभृति एषः नियमः अतिकष्टसाध्यः इति कृत्वा दूरीकृतः। परन्तु तृतीयश्रेण्याः न कापि उन्नतिः समापादि। न वा तद्विषयकविचारः वा अकारि। यद्यपि एषः प्रसङ्गा- तिक्रान्तः विषयः, तथापि प्रसक्तनुप्रसक्त्या वर्णितः।

## ७.६.आधुनिकं धूमशकटयानम्

अद्यत्वे भारतदेशे स्वतन्त्रे संवृत्ते पदे पदे तृतीयश्रेण्यां अपि सौविध्यम् उत्पादयन्ती वर्तते अस्मत् शासनसत्ता। अद्यत्वे तु तृतीयश्रेण्याम् अपि कासुचित् सुदीर्घसु पेटिकासु सुखस्वापशय्या इत्याद्याः सन्नाहाः वर्तते। इतः अपि अधिकं सौकर्यं भारतीयेभ्यः, विशिष्य अल्पधनेभ्यः विधातुं प्रयत्नशीलास्सन्ति शासननिर्वाहकाः। अद्य खलु अस्मिन् विविधानि सौकर्याणि उत्पादितानि विद्यन्ते। दूरदेशं जिगमिषवः कतिपयदिनेभ्यः यात्राचीटिकां क्रीत्वा निजस्थानपरिरक्षणं कर्तुं प्रभवन्ति। अतिदूर यात्रिणाम् एव केवलम् इति कृत्वा काश्चित् पेटिकाः निर्चिष्टाः वर्तन्ते। तासु तदितरपेटिकाऽपेक्षया अल्पसंख्याकाः यात्रिणः अनुमन्यन्ते। तेषां रात्रौ सुखस्वापसौकर्यं कल्पितं विद्यते। इत्थम्भूतासु पेटिकामण्डलीषु एका भोजनशालापेटिका वर्तते, यत्र यात्रादिभ्यः रुच्यनुगुणं स्वादिष्ठं भक्ष्यभोज्यादिकं यथाकालं विक्रियते। मध्ये मार्गं निर्दिष्टस्थानेषु पेटिकाशोधकाः आगत्य पेटिकासंमार्जनम्, शोधनं पेटिकाजलभाण्डेजलपूरणं कुर्वन्ति।एवमेव कतिपयोषु स्थानेषु यात्रिकृते स्नानागारः अस्ति यत्र यात्रिभिः शीतम् उष्णं वा लभ्यते। शकटविश्रामस्थलेषु अवतीर्णः यात्री यदि तत्पुरं ग्रामं वा गन्तुं इच्छति तर्हि सः तत्रत्यविश्रामस्थालाधिकारिणः सकाशे निजवस्त्वादिकं निक्षिप्य गन्तुं प्रभवति। एतदर्थं शुल्कं किञ्चित् वर्तते।तद्दानेन तद्वस्तु परिरक्ष्य अधिकारिणा परावर्त्यते।

## ७.७.उपसंहारः

एवं विधानि विविधानि सौविध्यानि धूमशकटेषु विद्यन्ते। एवं च अद्यतनेषु दिनेषु धूम- शकटः अस्माकं अतितरां सुखाधायकं यानसाधनं संवृत्तम्। विशेषतः वायुयानागमनात् प्रभृति धनिकाः तं वाञ्छन्ति। अतः साधारणजनानां मुख्यतः दरिद्राणां तु एतत् यानं ईश्वरीयवर- प्रसादरूपं इति यदि कश्चित् ब्रूयात् यत्र न कापि अत्युक्तिः।

**स्वावलोकनप्रश्नाः**

१.धूमशकटस्य तन्नाम कथं जातम् ?

२.आधुविकधूमशकटयानस्य सौकर्याणि कथं वर्तन्ते ?

# ८.स्त्रीस्वातन्त्र्यम्

**संरचना**

८.०. शीर्षिकायाः अर्थः
८.१. शीर्षिकायाः अभिप्रायः
८.२.प्राचीनकालीनं स्त्रीणां सामाजिकं जीवनम्
८.३.आधुनिकं स्त्रीणां सामाजिकं जीवनम्
८.४.स्वातन्त्र्यस्य दुरुपयोगवारणम्।
८.५.उपसंहारः

## ८.०. शीर्षिकायाः अर्थः

व्यवहारयोग्यं कर्म तन्त्रम् इति नाम्ना प्रसिद्धम्। स्वस्य ,तन्त्रम् = व्यवहारयोग्यं, प्रवर्तनायोग्यं वा कर्म स्वतन्त्रं भवति। तस्य भावः स्वातन्त्र्यम्, अनधीनप्रवर्तनम् इत्यर्थः। स्त्रियः अनधीनव्यवहारः वा, अनधीनप्रवर्तनम् वा, अनधीनता वा स्त्रीस्वातन्त्र्यम् इत्यस्य अर्थः भवति।

## ८.१. शीर्षिकायाः अभिप्रायः

स्त्रीणां स्वातन्त्र्यमावश्यकं न वा इति विषये बहुधा विप्रतिपत्तिरभिदृश्यते। तासां स्वातन्त्र्यं नास्ति।तदावश्यकमिति, बहवः कथयन्ति। तत्र प्रथमं स्वातन्त्र्यपदस्य अर्थः वर्णनीयः। परापेक्षां विनैव यः स्वशक्त्या कार्यसिद्धिम् आप्नोति सः स्वतन्त्र इत्युच्यते। तद्भिन्नः परतन्त्रः। पराधीनश्च। स्त्रियः प्रायशः जन्मनैव अबलाः। अतः ताः स्वकार्यनिर्वहणसमर्थाः न भवन्ति। पुरुषाः एव तासां प्रयोजनम् अपि साधयन्ति। तस्मात् पुरुषाः स्वतन्त्राः इति, स्त्रियः अस्वतन्त्राः इति च, विज्ञायते। अत एव तेषां स्वातन्त्र्यं नास्ति इति सिद्धं भवति। अत्र विषये–

**पिता रक्षति कौमारे, भर्ता रक्षति यौवने।**
**पुत्रो रक्षति वार्धक्ये न स्त्री स्वातन्त्र्यम् अर्हति।।** इति प्राचीनानां सूक्तिः एका प्रसिद्धा वर्तते। बाल्ये आविवाहात् पिता, यैवने भर्ता, वार्धके पुत्राश्च, स्त्रियः रक्षन्ति पोषयन्ति च। अतः स्त्रीणाम् आत्मरक्षण-पोषणादि-क्लेशः नावश्यकः इति तस्याः अभिप्रायः वर्णनीयः।

## ८.२.प्राचीनकालीनं स्त्रीणां सामाजिकं जीवनम्

धातूनाम् अनेकार्थतया अर्हतिउ प्राप्नोति इत्यर्थः वक्तुं शक्यते। अस्याः सूक्तेः विपरीतम् अर्थम् अभिवर्ण्य, पूर्वपुरुषैः स्त्रियः स्वभोगवस्तूनि परिकल्प्य, स्वेच्छास्वातन्त्र्यादिभ्यः दूरीकृत्य, दास्यशृङ्खलाभिः बद्ध्वा, आसायं महानसे, आसूर्योदयं च शयनगृहे च बन्दीकृताः। अपि च विद्याभ्यासे अधिकारनिर्वहणे च न तासाम् अल्पः अपि अवकाशः कल्पितः। पुरुषहस्तेषु ताःक्रीडा- कन्दुकीकृताः इति इति इदानीन्तनाः केचन पूर्वान् निन्दन्ति। तदिदं सर्वम् अपि अज्ञानविचलनम् एव इति वक्तव्यम्। पुरा तावत् विना वेदान् समस्तम् अपि संस्कृतवाङ्मयं स्त्रियः अपि समभ्य- स्यन्ति स्म।परन्तु धनसम्पादनोपयोगिविद्यास्तु ताभिः न पठिताः। तदानीं धनसम्पादनक्लेशः स्त्रीणां आवश्यकः न आसीत्। पुरुषाः एव सर्वं सम्पादयन्ति स्म। अन्यच्च तदानीन्तनाः यथालाभसन्तुष्टाः भूत्वा, आडम्बररहिताः ऐहिकसुखानि अतीव अनपेक्षमाणाः आध्यात्मकचिन्तनपराः जीवयात्रां नयन्ति स्म। अत एव स्त्रीणाम् अपि धनसम्पादनयत्नः आवश्यकः न आसीत्। शरीरस्य चर्मावरणम् इव स्त्रीणां रक्षणं पुरुषाणाम् अत्यावश्यकम्। चर्माणा आवृतम् आमिषं पक्षिणं इव पुरुषरक्षणरहितां स्त्रियम् अपहर्तुं धूर्ताः यतन्ते। अत एव पूर्वस्मिन् काले अबलानां परिरक्षणविषये अत्यन्तं जागरूकता स्वीक्रियते स्म। स्त्रियः अपि परपराभवम् आशङ्कमानाः एकाकिन्यः गृहात् बहिः गन्तुम् अपि बिभ्यति स्म। नारीशीलपरिरक्षणं मुख्यकर्तव्यं पुरुषाणाम्। पुरुषाः अपि स्ववनिताम् अर्धाङ्गीं प्राणसमां मन्यमानाः यज्ञादिपवित्रकर्म -निर्वहणे अपि तासाम् अवकाशं पर्यकल्पयन्।किं बहुना ? अपत्नीकस्य न कुत्रापि अर्हणा वर्तते। पुरुषेच्छाम् अनुसृत्य वर्तनम् एव प्राचीनवनितानां समुचितं श्रेयस्करम् इति च अनुमोदितम्। अत एव ताः स्वातन्त्र्यसम्पादनाय नैव अयतन्त। दाम्पत्यसम्बन्धं पवित्रं मत्वा पूर्वपुरुषाः स्वजायाम् अत्यन्तगौरवेण समभावयन्। धनार्जनयत्नं विना, स्त्रीणां सर्वत्र अपि पुरुषैः समानाप्रतिपत्तिःअस्ति इति ज्ञायते। परन्तु स्त्रीपुरुषाणां सहविद्याभ्यासः सहखेलनं,यथेच्छावर्तनम् इति अस्माकम् इदानीम् अपि अनुभवसिद्धम् एव। पुरा स्त्रीणां पुरुष-छन्द-अनुवर्तनरूपं स्वातन्त्र्यमङ्गीकृतम्। न तु स्वेच्छावर्तनरूपम्। तथाऽङ्गीकारे महान् प्रमाद इति तेषाम् आशयः। नेयं प्राचीना पद्धतिः समीचीना, नवेति विमर्शनं न इदानीम् आवश्यकम्। तदानीं तादृशपरिस्थितिः सर्वैः समादृता।

## ८.३.आधुनिकं स्त्रीणां सामाजिकं जीवनम्

कालान्तरेण राजधर्माः समाजधर्माश्च परिणताः। देशकालपात्रस्वभावानुसारेण बहुल- प्रयोजन-मतिं परिगृह्य लोककल्याणकामुकाः महात्मानः समाजधर्मेषु संस्कारमनुमोदन्ते।अतएव कालक्रमानुसारं बहूनि धर्मशास्त्राणि विरचितानि। इदानीं भारतदेशस्थितिः अनुदिनं नूतनचैतन्यं भजते। खण्डान्तरीयसम्पर्कवशात् आहारविहारव्यवहारेषु नूत्नभावाः सर्वेषां हृदयेषु समुत्पद्यन्ते। परानुकरणं भोगलालसता च अनुदिनम् अभिवर्धते। तत्कृते येन केन वाऽप्युपायेन धनार्जनं मुख्य- कर्तव्यम् अस्ति। केवलपुरुषैः सम्पाद्यमानेन एव धनेन जीवयात्रानिर्वहणं दुस्साध्यं भवति। अतः स्त्रियोऽपि धनसम्पादकविद्याम् अभ्यस्य,अधिकारपदम् आरुह्य,धनसमार्जनं कुर्वन्ति। तद् अवश्य कर्तव्यमापतितं दाम्पत्यसम्बन्धं विलासप्रायं मन्यन्ते इदानीम्।दम्पत्योः परस्परपरित्यागः सुकरः वर्तते।अतः विशेषतः नारीणां स्वरक्षण-पोषणादि-कार्येषु सामर्थ्य-सम्पादनं अवश्यकर्तव्यं भवति।

## ८.४.स्वातन्त्र्यस्य दुरुपयोगवारणम्

स्त्रीभिः पराधीनत्वाभावरूपमेव स्वातन्त्र्यं समभिलषणीयम्।न तु स्वेच्छया विहाररूपम्। तत्र बहवो दोषाः वर्तन्ते इति विदितमेव।

## ८.५.उपसंहारः

अतः भारत-नारी-मणयः स्वशीलं सम्यक् परिरक्षन्त्यः आदर्शमहिला भूत्वा भारतदेश-गौरवम् अभिवर्धयन्त्यः समुचित-स्वातन्त्र्य-सम्पादयनाय यतेरन्।

**स्वावलोकनप्रश्नाः**

१.कीदृशं स्वातन्त्र्यं समभिलषणीयं भवति ?

२.स्त्रीणां कर्तव्यं किम् ?

# ९. व्यायामः

**संरचना**


९.०. शीर्षिकायाः अर्थः

९.१ शीर्षिकायाः अभिप्रायः

९.२.आरोग्यस्य आवश्यकता

९.३.आरोग्यस्य परिरक्षणे व्यायामस्य स्थानम्

९.४.व्यायामस्य स्वरूपम्

९.५.व्यायामस्य वैविध्यम्

९.६. उपसंहारः


## ९.०. शीर्षिकायाः अर्थः

व्यायामः इति शब्दः वि आङ् इत्युपसर्गाद्वयपूर्वकात् यम धातोः घञ् प्रत्यये कृते निष्फन्नः। सूक्ष्मरूपेण शरीरकणजालस्य स्पन्दनपूर्वकं परिश्रमजनयित्री काचित् कृत्रिमा प्रक्रिया। परम् इदं पदं शारीरकव्यायामे एव प्रसिद्धम् इव भासते। परं तथा न,शारीरकव्यायामेन सह बौद्धिकं,मानसिकं च परिश्रमजनकं कृत्रिमस्पन्दनमपि व्यायामशब्देन अभिप्रेतम् एव । अतः कृत्रिमस्पन्दनं सर्वम् अपि व्यायामशब्दस्य अर्थः भवति। व्यायामशब्दस्यैव अर्थः एवं निर्णीतः वाग्भटेन-शरीरायासजनकं कर्म व्यायाम उच्यते इति। शरीरस्य आयासजनकः कर्मविशेषः व्यायामः इति।

## ९.१. शीर्षिकायाः अभिप्रायः

व्यायामपदस्य अपरः अर्थः अपि एवं वक्तुं शक्यते। दुर्व्यापारेभ्यः,दुरभ्यासेभ्यश्च मनसः निरोधः। प्रत्यक्ष-अनुभवहेतोः मनसः निरोधात् तेभ्यो दुरुपसर्गपूर्वेभ्यः कर्मभ्यः तत्तत् अवयवानां निरोधोऽपि प्रसिद्धः एव। अपि च अस्य व्यायामशब्दस्य क्रीडादयः अपि अर्थाः भवन्ति। अस्मिन्नेव योगाभ्यासः अपि अन्तर्भवति। तपोविशेषः अपि व्यायामे अन्तर्भवति इति केचित्। परन्तु साधारणतया नियमपूर्वकः परिश्रमविशेषः व्यायामः इति वक्तु शक्यते।

## ९.२.आरोग्यस्य आवश्यकता

सर्वोषाम् अपि मानवानां सुखजीवनाय आरोग्यम् अत्यन्तम् आवश्यकम्। आरोग्येण विना मानवः सर्वथा पतितः एव।जीवन् अपि मृतकल्पः। न तेन सुखस्य लेशः अपि अनुभूयते। अतः खलु 'आरोग्यं हि महाभाग्यं नाम' इत्येव जनश्रुतिः। व्युत्पत्त्याउ अवगाहनापरतया महते आयुर्वृद्धिसम्पाद- नाय, आरोग्याय च मानवैः सर्वैः अपि तत्र प्रयतितव्यम्। तत्रापि प्रधानतया व्यायामस्य जीवनानन्दंप्रति कारणत्वात्।

## ९.३.आरोग्यस्य परिरक्षणे व्यायामस्य स्थानम्

व्यायामः शरीरस्य संरक्षणे प्राधान्यं वहति। ये ये मानवाः धर्मसाधनाय प्रयतन्ते तेषां यथा यथं शरीरस्य संरक्षणम् आवश्यकम्। शरीररक्षणाय च तैः व्यायामः संसेव्य, आरोग्यरक्षण विषये व्यायामस्य प्राधान्यात्। अत एव उक्तं कालिदासेन- शरीरम् आद्यं खलु धर्मसाधनम् इति।

## ९.४.व्यायामस्य स्वरूपम्

अयमेव व्यायामशब्दः कालक्रमेण स्वान् तपोयोगात्मकन् अर्थान् विहाय एतस्मिन् अर्थे रूढः। यथा पाठशालासु विद्यार्थिभिः प्रातस्सायं च क्रियमाणं स्वेदजनकं क्रीडाव्यपदेश्यं परिश्रमात्मकं कर्म इति।

## ९.५.व्यायामस्य वैविध्यम्

तच्च उत्क्षेपण, आक्षेपण, आकुञ्चन, गमन, धावन,लङ्घनात्मकं सर्वत्र व्यावृतं च। कन्दुकक्रीडादयः अपि कलाविशेषाः इति व्यायामे परिगृहीताः। एवम् एव सूर्यनमस्कारादयःअपि। पद्मासनादयश्च। सूर्यनमस्कारादयः तपोविशेषे अन्तर्भूताः। तेषु अपि बहवो भेदाः दृश्यन्ते। अर्थतः परामृष्टे व्यायामशब्दे एवं अर्थद्वैविध्यम् आपतति। ईश्वरविषयकः व्यायामः, तपोयोगात्मकः व्यायामः। निरीश्वरविषयकः व्यायामः क्रीडाव्यपदेश्यः।तत्र आद्यम् आस्तिकानाम्, अन्यत् आरोग्यमात्रविषयतया सर्वेषाम् अपि।

'यत् दुष्करं यत् दुरापं यत् दुर्गं यच्च दुस्तरं, सर्वन्तु तपसा साध्यम् 'इति सेश्वरविषयकव्यायामत्वेन तपसः प्रसिद्धिः। सूर्यनमस्कारात्मकेन स्तोत्रेण मयूरो नाम महाकविः कुष्टुरोगात् विमुक्तः,सम्पूर्णम् आरोग्यम् अवाप इति पण्डितजनादृतिः।

अद्यापि तत्प्रोक्तं सूर्यशतके शतकं च एतत् संस्कृतशतकसाहिती-भारती-मकुटायमानम् इति न काचित् अपि विप्रतिपत्तिः।

## १.६. व्यायामस्य उपयोगाः

व्यायामविहीनस्य एते रोगाः प्रभवन्ति-अग्नौ जठरे मान्द्यम्, अवयवेषु दौर्बल्यम्, कर्मसु मुख्येषु अपि अलसत्वम्, शरीरे मालिन्यप्रभवा कण्डूतिः, एवमादयः बहवः। किञ्च गमनेन आयासः, लम्बोदरत्वम्, अल्पेऽपि वयसि वार्धकलक्षणानि, इति अनर्थपरम्परा। व्यायामेन एतानि बहूनि प्रयोजनानि सम्पद्यन्ते। लाघवं शरीरस्य, नैर्मल्यं रक्तस्य, सम्यक् प्रसारः रक्तस्य, पटिष्ठता सिराणाम्, विनिवर्तनक्षमत्वम् अङ्गसन्धीनाम्, मेद्यायाः शक्तिः इति एवमादीनि।

व्यायामेन शरीरगतं रक्तास्थिगतं च मालिन्यं स्वेदरूपेण बहिः गच्छति। स्पर्शानुकूलस्य वायोः सेवनेन सर्वस्य अपि अङ्गस्य निर्दुशष्टता सम्पद्यते। तदा सुखं हि निद्राति। सर्वासु कलासु सर्वेषु कार्येषु च कुशली भवति। विषयग्रहणे धारणे च बुद्धेः विकासः एकाग्रता च सिध्यति। एवं जागरूको नरः अरोगः भवति।

## १.७. उपसंहारः

अतः सर्वैरपि मानवैः वयसः अनुरूपः व्यायामः प्रत्यहं कर्तव्यः। सर्वैः नीरोगता सम्पाद- नीया। 'सर्वे सन्तु निरामयाः' इति च मनसि अवधार्य आरोग्यं प्राप्य सुखजीवनम् आप्तुं प्रयत्नं कुर्यः।

**स्वावलोकनप्रश्नाः**

१.व्यायामशब्दः कथं विस्तृतिम् आप्नोति ?

२.व्यायामहीनतायाः दुष्प्रभावः कः ?

# १०.ग्रन्थालयस्य आवश्यकता

**संरचना**

१०.०.शीर्षिकायाः अर्थः
१०.१.शीर्षिकायाः अभिप्रायः
१०.२.ग्रन्थालयानां नेपथ्यम्
१०.३.ग्रन्थालयानाम् आनिर्भावः
१०.४.ग्रन्थालयानाम् वैविध्यम्
१०.५.ग्रन्थालयानाम् प्राधान्यम्
१०.६. उपसंहारः

## १०.०.शीर्षिकायाः अर्थः

ग्रन्थानाम् आलयः = ग्रन्थालयः तस्य, ग्रन्थालयस्य = पुस्तकभाण्डागारस्य; आवश्यकता = अवसरः कः ? सः च कीदृशः ? इति अस्याः शीर्षिकायाः अर्थः।

## १०.१. शीर्षिकायाः अभिप्रायः

मानवः बुद्धिजीवः, अत एव च विवेचनापरः। सः सर्वदा स्वीयबुद्धिं क्रियाशालिनीं करोति। पुस्तकपठनाय चोदयति। आलोचनां प्रेरयति। विश्लेषणारीतिम् अभ्यासयति।समाचरम् आप्नोति। विज्ञानं विनोदं च अनुभवति। एतत् प्रक्रियायां सततम् बुद्धेः अभ्यासदानम् आवशयकम्। प्रेरणा- त्मकम्, आलोचनात्मकं च अभ्यसनं पुस्तकपठनमेव भवति। एतत् लक्ष्यसाधनाय ग्रन्थालयानाम् आवसरः विद्यते इति शीर्षिकायाः अभिप्रायः।

## १०.२. ग्रन्थालयानां नेपथ्यम्

प्राचीनकाले ग्रन्थकर्तारः ग्रन्थान् तालपत्रेषु वा भूर्जपत्रेषु वा लिखन्ति स्म। ग्रन्थपठने इच्छवः महता प्रयासेन राजानः, सम्पन्नाः, गृहिणश्च विद्वद्भिः लिखितान् कतिपयान् प्रमुखान् ग्रन्थान् निजगृहेषु निक्षिप्य श्रद्धया रक्षयामासुः। मुद्रणालयस्थापनानन्तरं पिपठिषवः स्वल्पमूल्येन ग्रन्थान् क्रीत्वा पठन्ति, येन वाङ्मये रताः ते , बहूनि पुस्तकानि क्रीत्वा, गृहेषु संरक्षन्ति।यस्मिन् गृहभागे पुस्तकानि निक्षिप्य पठ्यन्ते स पुस्तकालयः इति उच्यते। आंग्लभाषायां पुस्तकालयस्य नाम लैब्ररी(Library) इति कथ्यते। तत् पदं न केवलं ग्रन्थनिलयं किन्तु ग्रन्थसङ्ग्रहणम् अपि बोधयति।

## १०.३.ग्रन्थालयानाम्  आनिर्भावः

ग्रन्थालयाः देशस्य अभ्युदयाय मानवविज्ञानवर्धनाय च कल्पन्ते।बह्व्यः पाठशालाः कलाशालाश्च सम्भूय यम् अभ्युदयं सम्पादयन्ति तं सर्वम् अपि ग्रन्थालयः एकः एव कर्तुं प्रभवति। धनिकाः दरिद्राश्च, बालाः वृद्धाश्च, स्त्रियः पुमांसश्च यथेच्छं तत्र गत्वा विज्ञानं प्राप्नुयुः। ग्रन्था- लयेषु विविधविषयान् अधिकृत्य प्रतिभावद्भिः विद्वद्भिः विरचिता बहवः ग्रन्थाः स्युः। धनशालिनः विद्याप्रियाः जनाः अपि प्रत्येकं बहुसङ्ख्याकान् ग्रन्थान् क्रेतुं न शक्नुवन्ति। तस्मात् अनेकान् महाग्रन्थान् यदि एकत्र लब्धुम् इच्छा स्यात् तर्हि ग्रन्थालयः एव शरणीकरणीयः। ग्रन्थालयाः अतीतेषु कालेषु ये प्रतिभासम्पन्नाः विद्वासः अवर्तन्त तेषाम्  अनर्घानि भावरत्नानि, स्वसन्निधिं प्राप्तवद्भ्यः जनेभ्यः, उदाराः दातारः इव यच्छन्ति स्म। तत्र भिन्नकृतीनां जनानाम् अनुगुणाः बहवः ग्रन्था वर्तन्ते। तस्मात् पाठकानां यस्मिन् ग्रन्थे अभिरुचिः अस्ति तं गृहीत्वा पठितुम् आनु- कूल्यं भवति।यस्मात् ग्रन्थालयाः रसवतां ग्रन्थानां निधानानि भवन्ति तस्मात् ते दुःखपूरितानां जनानां मित्राणि इव आश्वासम् आनन्दं च आपादयन्ति। सन्देहनिवारणार्थं विद्वद्भिरपि पठित- व्यानि पुस्तकानि अधिकमूल्यानि ग्रन्थालयेष्वेव लभ्यन्ते। दिनभागे स्वस्वकार्येषु व्यग्राः श्रान्ताः जनाः सायंकाले ग्रन्थालयेषु विश्रान्तिं लभन्ते। तत्र ते अभिमतान् ग्रन्थान् पठित्वा न केवलं विज्ञानम्, किन्तु विनोदम् अपि प्राप्नुवन्ति।यतः नवीनाः ग्रन्थाः विविधाः वार्तापत्रिकाः अपि ग्रन्था- लयेषु निक्षिप्यन्ते। ततः पाठकाः नूत्नपरिशोधनपरिणामान् प्रपञ्चप्रवृत्तिं च विज्ञातुं पारयन्ति। विद्यार्थिभ्यः ग्रन्थालयः कल्पवृक्षः एव, यस्मात् तेषां सर्वे संशयाः निरस्ताः भवन्ति।

## १०.४.ग्रन्थालयानाम्  वैविध्यम्

ग्रन्थालयेषु बहवः भेदाः सन्ति। केचित् अर्थानपेक्षकाः सर्वसामान्याश्च। केषुचित्पाठकाः मासि मासि नियतधनं दत्वा सभ्याः भवन्ति। ते ग्रन्थालयेभ्यः पुस्तकानि गृहं नीत्वा पठनानन्तरं परावर्तयन्ति। केषुचित् प्रदेशेषु प्रभुत्वप्रतिष्ठिताः ग्रन्थालयाः सन्ति। सर्वे पौराः तत्र गत्वा यथेष्टं पुस्तकानि पठन्ति। पाठशालासु कलाशालसु च विविधविज्ञानमयग्रन्थनिधयः ग्रन्थालयाः स्युः। अद्यतनकाले ग्रन्थालयानां प्रामुख्यं ज्ञात्वा ग्रामेष्वपि तान् स्थापयितुं यत्नाः क्रियन्ते। पाश्चात्य- देशेषु ग्रामाद् ग्रामं सञ्चरन्तः ग्रन्थालयाः अपि सन्ति। केषुचित् पुस्तकालयेषु हस्तलिखिताः तालपत्रलिखिताश्च ग्रन्थाः सङ्गृह्यन्ते। एते लिखितपुस्तकभाण्डागाराणि इति कथ्यन्ते।

प्रपञ्चे विविधदेशेषु महान्तः जातीयग्रन्थालयाः वर्तन्ते । अस्माकं देशे एतादृशाः महान्तः ग्रन्थालयाः कलिकाता-मद्रपुरी इत्यादिनगरेषु विराजन्ते

## १०.५.ग्रन्थालयानाम् प्राधान्यम्

पाठशालासु ग्रन्थालयानाम् अपरं प्राधान्यम् अस्ति। यथा हृदयं शरीरे विविधावयवेभ्यः अवसर -अनुगुणं रक्तं प्रसारयतु तथा ग्रन्थालयः अपि विद्यार्थिभ्यः विविधेभ्यः तत्तत् सामर्थ्यम् आवश्यकं च अनुसृत्य विज्ञानं विसरति। तस्मात् पाठशालाधिकृताः पाठशालाहृदयसदृशानां ग्रन्थालयानां विषये न किञ्चित् अपि लोभं कुर्वीरन्।ग्रन्थालयविहीनासु पाठशालासु विद्या असमग्रा भवति इत्यत्र न सन्देहः।

## १०.६. उपसंहारः

अतः पुस्तकसङ्ग्रहे अनल्पा जागरूकता प्रदर्शितव्या। सद्ग्रन्थाः यावतीम् उपकृतिं कुर्वन्ति, दुर्ग्रन्थाः तावतीम् अपकृतिं कुर्वन्ति। तस्माद् दुर्नीतिबोधकाः उद्रेकजनकाश्च ग्रन्थाः ग्रन्थालयेषु न कदाचित् अपि सङ्ग्राह्याः।

**स्वावलोकनप्रश्नाः**

१.ग्रन्थालयाः किमर्थम् आविर्भूताः ?

२.विद्यार्जनविषये ग्रन्थालयस्य स्थानं किम् ?

# ११.जीवन् भद्राणि पश्यति

**संरचना**

११.०. शीर्षिकायाः अर्थः

११.१. शीर्षिकायाः अभिप्रायः

११.२. शीर्षिकायाः सन्दर्भविवरणम्

११.३. सोत्साहं जीवनाय सन्देशसाहित्यस्य चिन्तनम्

११.४. जीवनम् -अवकाशः (Life is an opportunity)

११.५. प्राणत्यागः नैव कर्तव्यः

११.६. शिक्षितं जीवनं श्रेयसे कल्पते

११.७. उपसंहारः

## ११.०.शीर्षिकायाः अर्थः

जीवन् = प्राणान् धारयन् पुरुषः; भद्राणि = श्रेयांसि, कल्याणानि; पश्यति = अधिगच्छति; इति शीर्षिकायाः अर्थः।

## ११.१. शीर्षिकायाः अभिप्रायः

जीवनधारणम्, कल्याणप्राप्तिः, जीवनस्य अमूल्यत्वम्, तस्य सदुपयोगः, आत्महत्यादीनां दोषहेतुत्वम्, जीवनरक्षणप्रकारः, इति अयं शीर्षकार्थस्य स्थूलो विभागः। जीवनं रक्षतो मनुष्यस्य शुभप्राप्तिः इह सम्भाव्यते। इत्थम्, आपाततः परिशीलने शीर्षकम् इदं सरलार्थकम् एव,तथापि सूक्ष्मदृष्ट्या पर्यालोचने गम्भीरार्थस्फोरकं प्रतिभाति। श्रेयस्साधनाय प्राणधारणं प्रथमं कर्तव्यम् इति शीर्षिकायाः अभिप्रायः।

## ११.२.शीर्षिकायाः सन्दर्भविवरणम्

अयं च श्लोकभागः श्रीमद्रामायणे सुन्दरकाण्डे दृश्यते –

**विनाशे बहवो दोषाः, जीवन् भद्राणि पश्यति।**
**तस्मात् प्राणान् धरिष्यामि, ध्रुवो जीवति सङ्गमः ।।**

इति समग्रः श्लोकः। लङ्कायां सीतादेवीम् अन्विष्य तस्याः अदर्शनेन चिन्ताकुलस्य हनुमतः मुखात् अयं श्लोकः विनिर्गतः। सीतान्वेषणाय समुद्रतरण-लङ्काप्रवेशादिकम् अतिसाहसकृत्यं हनुमता कृतम्। तथाऽपि सीतादर्शनरूपफलप्राप्तिस्तु तस्य प्रथमतः

न आसीत्। तेन निर्विण्णः अयम् अन्यत् कर्तव्यम् अपश्यन् प्राणत्यागार्थं कृतनिश्चयः अभूत्। तस्याम् अतिक्लिष्टदशायां किमपि आशाज्योतिः तस्मिन् समुन्मिषितम्। येन च मरणोद्यमात् विरतः प्रसन्नहृदयः नीतिसूक्तिम् इमां स्मरति। आर्यधर्मैकनिलये श्रीमद्रामायणे तावत् ईदृशानि सूक्तिरत्नानि बहूनि दृश्यन्ते। हनुमत्सन्देशप्रभावात् उद्बन्धनात् विरता कम् अपि अभिनवम् उल्लासम् अनुभवन्ती सीता- जननी यदा हनुमता सह सम्भाषितुम् उपचक्रमे तदा भगवान् वाल्मीकिः —

**कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे ।**
**एति जीवन्तम् आनन्दो नरं वर्षशतात् अपि ।।**

इति काम् अपि महितार्थगर्भा नीतिं प्रावर्तयत्। नीतिः इयं शीर्षकस्यास्य विवरणप्रायैव।

## ११.३.सोत्साहं जीवनाय सन्देशसाहित्यस्य चिन्तनम्

तथा च सीतायाः, तथा भगवतः श्रीरामचन्द्रस्य, हनुमतः, च चरितं सूक्तिः इयं लक्ष्यीकरोति। इत्थं परश्शतानि नीतिवचनानि तत्र तत्र संलक्ष्यन्ते –

कालक्रमेण जगतः परिवर्तमाना चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः। 'कस्यापि अन्तं दुःखमपि अन्ततो वा नीचैः गच्छत्युपरि च दशा चक्रनेमिक्रमेण' इत्यादीनि। महितगम्भीरप्रौढार्थविलसितम् इदं नीतिवचनजातं सङ्कटे महति वर्तमानान् नैराश्य निरपेक्षत्वादि-दाव-सन्तप्तान् जनान् उपदेशामृतसारैः अभिषिञ्चति।तेषु च काम् अपि अभ्युदया- शंसाम् आतनोति। अतिकष्टासु दशसु जनता इयं कर्तव्याणि विस्मरति। अकर्तव्याणि कर्तुम् उद्यतते। इत्थम् अज्ञानतमस्तिरोहिते गहने कार्यमार्गे नीतिजातम् इदं प्रदीपायते। अनेन नीत्युप देशेन नैराश्यदग्धेषु किमपि समाश्वसनं सान्त्वनं च समुन्मिषति। यथा यथा पर्यालोच्यते तथा तथा कापि गम्भीरार्थस्फूर्तिः अस्मात् नीतिवचनात् भवत्येव।

## ११.४.जीवनम् -अवकाशः (Life is an opportunity)

सर्वम् अपि अतीत्य जीवनं परमकल्याणम्।तस्य साधनं कथम् इति परिशीलयामः। सर्वा इयं लोकयात्रा, सति जीवने, भवति। यस्मिन् क्षणे जीवनं विरतं भवति तस्मिन् एव क्षणे लेकेन बन्धः अपि विमुक्तः भवति। सर्वः अयं लोकः सुखदुःखमिश्रः। सर्वः अपि जन्तुः दुःखानि तरितुं सुखानि लब्धुं च प्रयतते। तथाऽपि सर्वस्य लोकतन्त्रस्य कर्मबद्धत्वात् सर्वस्य जनस्य सुखं वा दुःखं वा अनुत्प्रेक्षितम् एव

समापतति। सुकर्मणा सुखं दुष्कर्मणा दुःखम् इति हि व्यवस्था। सुकृत-दुष्कृतयोः सुख-दुःखयोश्च व्यवस्थाम् इमां पश्यन्तः विवेकिनः सुखे अपि न हृष्यन्ति दुःखे अपि न विषीदन्ति। अतिसङ्कटे अपि सहनं साधुशीलम्। असहनं प्राकृतजनशीलम्। प्राकृतजनाः विवेकरहिताः रजस्-तमोभ्यां पराभूताः कियता अपि क्लेशेन प्राणत्यागादिसाहसानि कुर्वन्ति। तदुक्तम् -

**सहसा विदधीत न क्रियाम् ,अविवेकः परमापदां पदम् ।**
**वृणुते हि विमृश्यकारिणम्, गुणलुब्धाः स्वयमेव सम्पदः ।।**

इति, सर्वैः अपि सहनशीलम् अभ्यसनीयम्। येन वयं सर्वसम्पदाम् आश्रयाः भवेम। सहनव्रतं सर्व- अर्थ साधकम्।

## ११.५.प्राणत्यागः नैव कर्तव्यः

सम्प्रति लोके भग्नाशाः बहवः जनाः धूमशकटमार्गेषु पतित्वा वा, विषपानेन वा विद्युत्- शक्तिस्पर्शेन वा आत्महत्यां कुर्वन्तः महता पापेन कलुषिताः भवन्ति इति वयं पश्यामः। आत्मघा- तिनां जनानाम् अन्ध-तामिस्त्रादि-नरकपातः स्मृतिषु वर्णितः। पिशाचादिघोरजन्मभिः ते अत्यन्तं पीड्यन्ते च। अतश्च दुस्सहानि अपि दुःखानि सहमानः जनः पश्चात् सुखमपि द्रक्ष्यति एव। सुखं वा दुःखं वा जीवनस्य स्वभाव एव। यथा सुखेन जन्तुः सम्मोदं भजते तथा दुःखेन अपि कमपि संस्कारं लभते एव। जन्तूनाम् अनुग्रहार्थम् एव दुःखम् अपि भगवता कल्पितम् इति मन्त- व्यम्। हलकृष्टेषु केदारेषु श्यामलानि सस्यानि प्ररूढानि महतीं शोभाम् आतन्वते।

## ११.६. शिक्षितं जीवनं श्रेयसे कल्पते

इत्थमेव दुःखपरम्पराकर्षितः अपि जन्तुः कमपि संस्कारं लभत एव। सुखस्य अनन्तरं दुःखम्, दुःखस्य अनन्तरं सुखम्, इत्यादिवचनानि परिशीलयतां दुःखे अपि सुखम्, सुखे अपि दुःखम् च अनुभवगोचरीभवतः। अतश्च महति अपि सङ्कटे प्राणत्यागः न कर्तव्यः। बहुमूल्यान् प्राणान् कदा अपि मनुष्यः न त्यजेत्। इमे प्राणाः, इदं च शरीरम्,अयं च इन्द्रियवर्गः केनापि निर्मातुं न शक्यन्ते। एषां च पवित्रेषु कार्येषु विनियोगः एव भगवता समुद्दिष्टः। दुर्लभं मानुषं जन्म लब्ध्वा, ये तावत् समीचीने कार्ये, तत् न नियुञ्जते ते जन्मनः फलं न लभेरन्।'शरीरम् आद्यं खलु धर्म साधनम्' इत्युक्त्या शरीरस्य धर्मसाधनत्वम् अभिसंहितम्। तद्विस्मृत्य तादृशशरीरस्य नाशे ये यतन्ते ते मूढाः नरकम् एव यान्ति।

## ११.७.उपसंहारः

अतः श्रेयः प्रेयश्च कामयमानेन पुरुषेण प्रथमतः शरीररक्षणं कर्तव्यम्, पश्चात् शरीरस्य सत्कार्यशिक्षणं च। ये तावत् जन्मनः बहुमूल्यतां ज्ञात्वा शरीरादिकं रक्षन्तः सुख-दुःखादिकं सह मानाः जीवनं यापयन्ति, सत्कार्याणि च कुर्वते, ते इह च अमुत्र च भद्रदर्शिनः भवन्ति इति शीर्षकम् इदम् उपदिशति।

**स्वावलोकनप्रश्नाः**

१.जीवन् भद्राणि पश्यति, इदं वचनं कस्य प्रतिकूलम् ?

२.मनसः निर्वेदस्य अपनोदनार्थं किं कर्तव्यम् ?

# १२.नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण

**संरचना**

१२.०. शीर्षिकायाः अर्थः

१२.१. शीर्षिकायाः अभिप्रायः

१२.२. शीर्षिकायाः सन्दर्भविवरणम्

१२.३. पौराणिकपुरुषाणां उदापरणदानम्

१२.४. श्रीरामस्यकष्टमयं जीवनम्

१२.५. उपसंहारः

## १२.०. शीर्षकायाः अर्थः

दशा = मानवस्य भाग्यावस्था; चक्रनेमिक्रमेण,चक्र = चक्रकस्य; नेमि = अराणां; क्रमेण = पङ्क्त्या (पद्धत्या, क्वचित्) नीचैः = अधः; (क्वचित्) उपरि च = ऊर्ध्वं च; गच्छति = याति इति शीर्षकायाः अर्थः।

## १२.१.शीर्षकायाः अभिप्रायः

यथा चक्रस्य नेमिः अधस्तात् उपरि च यानकाले भ्रमति, तथा जीवितकाले प्राणिनां दशा अपि भ्राम्यति। अतः दुःखं वा सुखं वा न नियतं देहिनाम् इति लोकज्ञः कालिदासमहाकविः यक्ष मुखेन मेघसन्देशे काव्ये सार्वकालिकं सत्यम् उज्जुघोष।प्राणिनां जन्मान्तरीय-सुकृत -दुष्कृत - वशात् तत्तत् युक्तकाले तैः सुखरूपं, दुःखरूपं फलम् अनुभाव्यं भवति। लोके यः कश्चिदपि सर्वदा न सुखी, सर्वदा नापि च दुःखी इति निश्चप्रचम्। एतत् अविज्ञाय,ज्ञात्वापि च सुखम् अनुभवितुम्, दुःखं निराकृर्तुम् ,देहिनः वृथा यतन्ते। अहो ! दुःखमये जगति रुदन् आविर्भूय, दुःखं त्यक्तुं अलभ्यं सुखम् आप्तुं च प्राणिवर्गः मूढः यतते। दुःखस्य दुर्भरत्वात् निरासयत्नः समुचितः एव। स्व हस्तगतः इव सुखे अभिलाषः कथम् इति चेत् देही स्वतः आनन्दमयः परमात्मैव। सुखस्वरूपस्य देहिनः (जीवस्य) तदभिलाषः सहज एव। तथाऽप्यज्ञानावृतो देही देहाभिमानम् अवाप्य, निजस्वरूपं विस्मृत्य बहिः दृश्यमानानि, मरुमरीचिकासदृशानि सुखानि अभिलषन्, विपरीतफलप्राप्त्या द्विगुणी कृतं दुःखमेव अनुभवति इति तत्त्वविदः वदन्ति।

## १२.२.शीर्षकायाः सन्दर्भविवरणम्

एतत् मनसि कृत्वा कालिदासमहाकविना 'कस्य एकान्तं फलम् उपनतं दुःखम् एका- न्ततः वा ' इति उक्तम्। तत्काव्यनायकः यक्षः रामगिरिप्रवासात् पूर्वम् अपूर्वान् भोगान् बुभुजे। प्रभुणा शप्तः शून्ये गिरौ एकाकी विचरति। तत्प्रवासः एकवत्सरमितः एव, न तु यावज्जीवम् इति जानन् अपि 'स्वगृहे वसन्ती दयिता स्ववियोगम् असहमाना मरिष्यति 'इति बिभ्यन्, मासचतुष्टयं लोचने मीलयित्वा यापय। अनन्तरम् आवयोः सगतिः अवश्यं भाविनी, पुनः आवां सुखम् अनुभवि- ष्यावः इति मेघं दूतीकृत्य सन्दिशति।

## १२.३.पौराणिकपुरुषाणां उदाहरणदानम्

इत्थं मेघमुखेन वक्तुं तस्य महाकवेः वाल्मीकि-व्यासादिमुनिभिः पुराणेषु उपनिबद्धाः गाथाः एव प्रमाणं बभूवुः। नल-राम-युधिष्ठिरादयः महात्मानः जीवितकाले अल्पं सुखम्, अनल्पं च दुःखम्, अन्वभवन् इति ज्ञायते। इदानीम् अपि ये महात्मानः ते स्वधर्मदीक्षिताः सुखात् अपि अधिकतरं दुःखम् एव अनुभूय, शाश्वतिकीं कीर्तिम् अलभन्त, लभन्ते च। ये केचन आदौ स्वधर्मे तत्पराः अपि, दुःखातिशये प्राप्ते स्वधर्मं परित्यजन्ति, ते अपयशसः पात्राणि भवन्ति। अवशिष्टजनाः स्वधर्म वार्ताम् अपि अजानन्तः यशः वा अपयशः वा अलभमानाः क्रिमिकीटपश्वादिरिव, लोके उद्भूय अप्रसिद्धाः म्रियन्ते।

## १२.४.श्रीरामस्य कष्टमयं जीवनम्

श्रीरामः शैशवात् प्रभृति यौवराज्याभिषेकसङ्कल्पपर्यन्तं स्वप्नेऽपि दुःखलेशम् अजानन्, स्वयं विष्णोः अवतारभूतः अपि सीतालक्ष्मणाभ्यां सह महावने वसन् कीदृशं सुखम् अलभत ? सीतावियोग- काले तदीयदुःखदशां दृष्ट्वा शिलाः अपि रुरुदुः इति भवभूतिना वर्णितम् उत्तरराम चरिते। रावणवध -अनन्तरं कञ्चित्कालं निनाय अयोध्यायां सुखेन। पुनः सीतात्यागेन महत् दुःखम् एव अनुबभूव। विचार्यमाणे आदौ तस्य दशा उन्नतकोटिम् अधिगत्यापि अन्तराऽन्तरा नीचैः कोटिं प्राप्नुवन्ती पुनः शिरस्पदं पुनरधस्पदं याता इति स्फुटमेव खलु। जगदिदं सर्वदा सुखदुःखात्मकम् इति अस्मादृशां जन्तूनाम् उपदेष्टुं भगवान् रामरूपेण मर्त्यलोके अवतीर्य स्वयम् अनुभूय एव सुखदुःखे अभिनीतवान् इति प्राज्ञाः भवन्ति।

इत्थं सत्यवाक्यपरिपालनाय हरिश्चन्द्रः नलश्च महतः क्लेशान् अन्वभूताम्। युधिष्ठिरः अपि स्वधर्मम् अपरिहरन् सुखात् अत्यधिकं दुःखम् एव अन्वभवत्। राज्यलक्ष्मीप्राप्ति-अनन्तरं सुखम् आप दुःखमिश्रम्।

## १२.५.उपसंहारः

तस्मात् सुखदुःखयोः भ्रमणं नियतम् इति विज्ञाय, धीरैः दुःखनिरासार्थं वा सुखावाप्त्यर्थं वा न यतितव्यम् । सुखस्य अनन्तरं दुःखम्, दुःखस्य अनन्तरं सुखम् इति हि सूक्तिः। एतत्सत्यमेव। कालिदासेन 'कस्य एकान्तं सुखम् उपनतं दुःखम् एकान्ततो वा' इति प्रश्नपूर्वक 'नीचैः गच्छति...'इति दृष्टान्तेन स्फुटीक्रियते स्म।

**स्वावलोकनप्रश्नाः**

१.अस्यां शीर्षिकायां 'दशा'इत्यस्य अर्थः कः ?

२.श्रीरामस्य जीवने इयं कथम् अन्विता भवति ?

# १३.न संशयमानारुह्य नरो भद्राणि पश्यति

**संरचना**

१३.०. शीर्षिकायाः अर्थः
१३.१. शीर्षिकायाः अभिप्रायः
१३.२. संशयो नैव कर्तव्यः
१३.३. संशयस्य प्राधान्यम्
१३.४. दुष्यन्तस्य संशयाधिगमनम्
१३.५. नचिकेतस्य संशयाधिगमनम्
१३.६. उपसंहारः

## १३.०. शीर्षकायाः अर्थः

नरः = मानवः ;संशयम् = सन्देहम् ;अनारुह्य = अप्राप्य ;भद्राणि = श्रेयांसि; न पश्यति = न अधिगच्छति ; इति शीर्षकायाः अर्थः।

## १३.१.शीर्षकायाः अभिप्रायः

शास्त्रेषु सर्वेषु विषयविश्लेषणाय संशयम् उत्थापयन्ति। साधक-बाधकपुरस्सरं चर्चा च प्र चलति। अनुकूलनिश्चयश्च जायते। लोके अपि एवमेव सन्देहम् अधिगच्छेत्। संशयापनोदकः आ शयविनिमयश्च प्रचलेत्। संशयस्य बलं बलहीनतां च जानीयात्।तदर्थं संशयनिवारिणी चर्चा भवेत् । तत्र (सत्य)फलप्राप्त्यै श्रेयोमार्गः भवति,सः च मार्गः जनान् उद्धरति इति शीर्षिकायाः अभिप्रायः।

## १३.२.संशयो नैव कर्तव्यः

संशयं प्राप्तस्य जनस्य कदापि न कश्चन निर्णयो भवति।न तस्य भद्राणि भवन्ति च। स्थाणु-पुरुषयोः अन्यतरं दृष्ट्वा अयं स्थाणुः वा पुरुषः वा इति प्रथमतः सन्देहे ततः विशेषतः वि ज्ञाय स्थाणुः एवायम्,अथवा पुरुषः एवायम् इति निश्चिनोति।तादृशनिश्चयस्य न कदापि क्षतिः यः मौढ्येन प्रथमतः संशयम् आपद्यते सः निर्णयं न करोति ,भद्राणि च न पश्यति।अनुभूयमानेषु विषयेषु सर्वत्र सामान्यतः सन्देहः एव शीर्षमधिरोहति। लभ्यते वा न वा इति ततः सन्देहः एव शीर्षम् अधिरोहति।लभ्यते वा न वा इति ततस्संशयं विहाय एकपक्षव्यवस्थाम् अवलम्ब्य विषयम् अवाप्य सुखी वर्तते।यावज्जीवं संशयग्रस्तः सुखं न प्राप्नोति।'संशयात्मा

विनश्यति इति' वाक्य स्य अयमेव अभिप्रायः।यावज्जीवं संशयापन्नस्य नाशः एव भवति। अत एव सर्वेण अपि अन्ततः गत्वा कृतनिर्णयेन भाव्यम् इति न्यायविदां सरणिः।निर्णयतीरम् अप्राप्तस्य संशयप्रवाहपतितस्य नाशः एव भवति इत्युक्तिः न साहसिकी।

## १३.३.संशयस्य प्राधान्यम्

लौकिकेषु वैदिकेषु च वाङ्मयेषु निर्णयानुकूलः सशयः ज्ञानप्राप्तिहेतुः इति बहुधा दृश्यते तत्र तत्र।प्रष्टुस्संशयो नस्याद्यदि तर्हि न तस्य प्रश्नावकाशोऽस्ति । तदोपदेष्टुरन्तिकं गत्वा न पृच्छत्येव।उपदेष्टा च तं कथं छिन्नसंशयं करोति ? अत एव संशयविच्छेदाय संश्रय आश्रयणीयः इत्यत्र न कापि विप्रतिपत्तिः। निर्णयानुकूलस्संशयस्सुखाय भवतीत्यत्रानुभव एव प्रधानपदमम्, अधि रोहति,किं बहुन। हैन्दवानां स्वातन्त्र्यसम्पादने श्वेतमुखानाञ्चफ्सरणे पूर्वं गान्धिस्संशयो बभूव।लव णसत्याग्रहादिभ्यः श्वेतमुखान् कथं जेष्यामः,कथं च स्वातन्त्र्यं समुपार्जयाम इति कांग्रेस्नायकाः सर्वेपि सन्देहग्रस्ताः बभूवुः। तदा लोकम् भभितः संशयान्धकारस्स-मावृणोत्। ततः सर्वे मिलित्वा कञ्चन निर्णयम् अवाप्य केनचित् प्रयत्नेन स्वातन्त्र्यं समुपार्जितवन्तः।ततः भारतदेश शुभोदर्कः अभूत्।

## १३.४.दुष्यन्तस्य संशयाधिगमनम्

स्वीयोद्यमारम्भे सर्वः अपि जनः अग्रे संशयाविष्टः भवति।संशयप्राप्तिः सर्वस्य स हजा इति दृश्यते। पश्चात् कार्यनिर्णयं कृत्वा कृतयत्नःसफलमनोरथः भवति।यदि नित्यशङ्कितः स्यात् तर्हि दुःखभाग् भवति इत्यत्र न सन्देहलेशः अपि।निर्णयाननुकूलः संशयः दुःखाय भवति इति अनुभवविदितः।निराधारः अपि संशयः दुरन्तः मनुजं भ्रामयति इति दृष्टान्ततया सम्मतानि अनेकानि पूर्वचरितानि सन्ति।निर्णयासमर्थः संशयग्रस्तश्चेत् तस्य कष्टपरम्परा भविष्यति। तस्मात् निर्णयसमर्थेनसंशयग्रस्तेन पुरुषेण भाव्यम् इति बुद्धिमतां रीतिः। संशयोत्तरनिर्णयः कार्यसाधनः भवति। महात्मनाम् अपि प्रथमतः संशयः एव भवति इत्यत्र दुष्यन्तचरितमेव निदर्शनम्।कण्वाश्रमे शकुन्तलां दृष्ट्वा दुष्यन्तः प्रथमं ऋषिकन्यका वा न वा इति संशयाविष्टचित्तः बभूव।'अनिर्वर्ण-नीयं परकलत्रम्' इति च शकुन्तलाविमुखः अभूत्। ततः कैश्चित् हेतुभिः क्षत्रपरिग्रहक्षमा इति निर्णीय,ततः तस्याः प्राप्तौ कृतयत्नः बभूव।संशयानन्तरं जायमानः निर्णयः कार्यं साधयति इत्यत्र दुष्यन्तस्य यतनमेव प्रमाणतमम्। सन्देहविषयेषु वस्तुषु सत्पुरुषाणां बुद्धिप्रवृत्तयः एव प्रमाणम् इति निश्चित्य दुष्यन्तः प्रववृते।

## १३.५.नचिकेतस्य संशयाधिगमनम्

वैदिकवाङ्मये अपि कठोपनिषदि 'येयं प्रेते विचकित्सा मनुष्ये अस्तीत्येके नायमस्तीति चैके'इत्यत्र आत्मनि अस्तित्व-नास्तित्वसंशयः नचिकेतसः समजनि। संशयोत्तरं तेन यमः पृष्टः   सन् अस्ति इति एव आत्मा इति निर्णयं चकर।ततश्च विद्यया प्राप्तात्मलाभः सन् नचिकेताः संसारसागरात् उत्तीर्णोभवत् । महान्तं लाभमन्वभूच्च। यदि संशयो न स्यात् तर्हि न पृच्छत्येव यमम् आत्मानम् उद्दिश्य यदि अपृष्टः चेत् यमः 'नापृष्टः किञ्चिदब्रूयात्' इति न्यायम् अनुसृत्य न किञ्चिदपि वक्ति। कथम् आत्मलाभस्तु नचिकेतसः सम्प्राप्तः एव स्यात् ? ततः संशयोत्तरं तत्त्व जिज्ञासुः तत्त्वमपृच्छत्। तदनन्तर निस्संशयमुक्तः संशयोत्तरजनितेन निर्णयेन निष्कासित संशयः आत्मलाभम् अवाप्नोत् ।

## १३.६.उपसंहारः

तस्मात् लौकिके च वैदिके च मार्गे एतादृशी सरणिः दरीदृश्यते। संशयमारूह्य एव नरः भद्राणि पश्यति इति लोकोक्तिः।तदुक्तिरेव यदि यावज्जीवं संशयापन्नस्य नाशः एव शिष्यते इत्यु क्तिः समीचीना।यस्य मनः कस्मैचित् निर्णयाय सन्देहास्पदं भवति ,तस्य महान् लाभः इति सार्व जनीनम् एतत्।तस्मात् सर्वैः अपि संशयपूर्वकप्रश्न-प्रतिवचनैः यत्किञ्चित् अपि कार्यं साधनीयम् इति फलितम् ।

**स्वावलोकनप्रश्नाः**

१.बुद्धिमतां रीतिः का ?

२.कीदृशः संशयः भद्राणि  अधिरोहति ?

# १४.अश्नुते स हि कल्याणं व्यसने यो न मुह्यति

**संरचना**

१४.०. शीर्षिकायाः अर्थः
१४.१. शीर्षिकायाः अभिप्रायः
१४.२. उदाहरणभूतं राजकुमारस्य उदन्तम्
१४.२.१. राजकुमार्याः दर्शनम्
१४.२.२. सख्याः वारणम्
१४.२.३. राजकुमारी-राजकुमारयोः भाषणम्
१४.२.४. राजकमारस्य कष्टमग्नता
१४.२.५. राजकमार्याः कष्टाधिगमनम् उपसंहारः
१४.३. उपसंहारः

## १४.०. शीर्षिकायाः अर्थः

यः = यः मानवः; व्यसने = कष्टेषु; न मुह्यति = न निमग्नः भवति, किङ्कर्तव्यतामूढ त्वरपं मोहं न प्राप्नोति,सः = सः मानवः; कल्याणम् = (जीवितस्य) श्रेयसः सुखम् ; अश्नुते हि = अधिगच्छति खलु ; इति शीर्षिकायाः अर्थः।

## १४.१. शीर्षकायाः अभिप्रायः

जीवनस्य कष्टसुखे द्वौ पार्श्वौ। सुखम् अनुभवेत्। दुःखं च स्नागतीकुर्यात्।परं यदा क ष्टानि आयान्ति तदा क्लैब्यं नैव अधिगन्तव्यम्।तत्र च स्थिरता सहनशीलता, संयमनशीलता इति एते आवश्यकाः भवन्ति। एतान् आलम्ब्य यः दुःखानि अधिरोहति सः जीवने आत्मनः श्रेयस्साधकः भवति इति शीर्षिकायाः अभिप्रायः। अत्र एतदर्थस्फोरकं कस्याश्चन राजकुमार्याः वृत्तान्तम् उदाहरति।

## १४.२. उदाहरणभूतं राजकुमारस्य उदन्तम्

### १४.२.१. राजकुमार्याःदर्शनम्

उष्णरश्मिः मन्दकिरणः मन्दं मन्दं अस्ताचलं प्रविशन् अस्ति । पक्षिणःस्वकुलायान् प्रविशन्ति, पशवः सवत्साः सायं गृहान् परावर्तन्ते, कन्दर्पः कामुकान् बाधितुम् आरभते। सुधांशुः अपि कामिनीमनांसि ह्लादयन् मन्द्म् अभिवर्धते ।

उद्यानवाटिकायां कस्यांचित् वेदिकायां उपविश्य किमपि विचिन्तयन्तीं काशीराजकुमारीं स्वसख्या संलपन्तीं मृगयार्थम् आगतः कश्चन राजकुमारः अद्राक्षीत् । आगत्य सः राजकुमारः निकषा वेदिकाम्, तां सुखीम् अपृच्छत्। भोःको इयं राजकुमारी ? सौन्दर्यनिर्जितरतिः, चन्द्रवदना, बिम्बफलाधरा, कम्बुकण्ठी मृदुपाणिपल्लवा, अलक्तकालंकृतचरणारविन्दा, निराधारावल्लरीव, विजने अस्मिन् उद्याने किमपि विचिन्तयन्ती उपविष्टा वर्तते- इति । तदा सखी प्रतिवक्तुम् आरेभे ।

### १४.२.२.सख्याः वारणम्

अनयोः सल्लापम् आकर्ण्य राजकुमारी सखीम् आहूय 'कमले ! किम् अयं परपुरुषेण सस्मितः सल्लापः। अपसर ! तस्मात् प्रदेशात् ' इति । तदाकर्ण्य सखी राजकुमारोदन्तं राज कुमार्यै न्यवेदयत्।तदा राजकुमारी मिथः राजकुमारेण सल्लापम् इच्छन्ती सखीम् आहूय सखि ! पिपासा मां भृशं बाधते। समीपस्थां दीर्घिकां गत्वा जलम् आहर इति अवोचत्। तदाकर्ण्य सखी राजकुमारीं दृष्ट्वा मिलितः नागरिकः ते साधय ! ईप्सितम् । न अहम् अत्र स्थातुम् उत्सहे इति उक्त्वा निष्क्रान्ता।

### १४.२.३ राजकुमारी-राजकुमारयोः भाषणम्

गतवत्यां सख्यां राजकुमारी तं राजकुमारं वीक्ष्य किञ्चित् मन्दस्मिता लज्जानवतानना न किञ्चित् ऊचे। राजकुमारः, तां दृष्ट्वा, 'बाले ! त्वत् मुखपङ्कजं वीक्ष्य मत् मनः त्वयि एव लग्नम्। का त्वम् ? कुतः अत्र निवससि ?' इति प्रपच्छ। तत् आकर्ण्य राजकुमारी सञ्जात रोमाञ्चा प्रत्यवादीत् ।'राजकुमार ! काशीराजकन्या अहं सुजाता इति नाम्ना विख्याता। सख्या सह वनविहारार्थम् आगता अस्मि।भवान् राजकुमारोऽपि सन् यौवने वयसि राज्यादिकं परित्यज्य वने विहरन् करकमलधृतचापः कन्दर्पदर्पहरदिव्यदेहः आजानुबाहुः देशम् इमं कुतः अलञ्चकार, कस्य वा भवान् पुत्ररत्नम्, मद्भाग्यवशात् तत्र भवान् ' इत्यर्धोक्ते लज्जया विरमति। श्रुत्वा इमां तद्वार्तां अमृतसागरान्तर्निमग्नः इव सरोमाञ्चः किञ्चित् इव विवक्षुः आसीत्।

### १४.२.४राजकमारस्य कष्टमग्नता

तावत् एव कश्चन पञ्चास्यः अनयोः समीपं गर्जन् एव अगात्।राजकुमारी दृष्ट्वा तं मृगेन्द्रं कुररीव क्रोशन्ती समीपस्थं क्रीडागृहं धावति स्म।राजकुमारस्तु धनुषि सायकं सन्धाय केसरिणं हन्तुं तम् अनुधावन् सुदूरं गत्वा तं हरिं जधान। तत्र शत्रुभूपालः सर्वसैन्यपरिवृतः कुमारम् एनं ग्रहीतुं सन्नद्धः आसीत्। भूपः असौ राजकुमारम् एनं सिंहव्यापादनव्यापृतं स्वसैन्यैः आनाय्य स्वभवनं ययौ।

## १४.२.५. राजकुमार्याः कष्टाधिगमनम्

राजकुमारी तु सिंहानुगं राजकुमारं अदृष्ट्वा शोकाक्रान्ता पुनः धैर्यम् अवलम्ब्य तद्राज- कुमारान्वेषणे कृतनिश्चया आसीत्। तदा चारमुखात् उदन्तं सर्वं विदित्वा सख्या साकं शत्रुराज- धानीम्  अगमत्।गत्वा तत्र सा वैद्यवृत्तिम् अवलम्ब्य रोगिणः बहून् मूलिकादिदानेन निरामयान् कुर्वन्ती तस्मिन् नगरे महतीं कीर्तिं सम्पादयामास। एकदा,तद्देशाधिपस्य पत्नी रोगार्ता आसीत्। सः राजा वैद्यरूपां राजकुमारीम् इमाम् आनाय्य स्वभार्यायाः रोगनिदानम् अपृच्छत्।सा तस्याः रोग निदानं ज्ञात्वा,राजानम् एवम् अवादीत्–'राजन् ! मह्यम् एकम् अभीप्सितं वरं अर्धराज्यञ्च भवान्, यदि प्रयच्छसि  तर्हि तव महिषीम् इमां शान्तरोगां करिष्यामि 'इति। श्रुत्वा तद्वाक्यं सः राजा तथा इति प्रतिज्ञाम् अकरोत्।राजकुमारी तु तां औषधदानेन मुक्तरोगां कृत्वा राजानम् एवम् आह - भवत् निकटे कश्चन राजकुमारः त्वया वनात् नीतः अस्ति ।स सत्वरं त्वया विसर्जनीयः,  मे दातव्यम् अर्धराज्यञ्च इति। तदा स्वप्रतिज्ञानुसारं राजा राजकुमारं मुमोच, अर्धराज्यञ्च तस्यै प्रादात् । सुजाता राजकुमारी तं राजकुमारं अर्धराज्यञ्च लब्ध्वा स्वपितरम् आहूय क्षात्रेण धर्मेण तम् उपयेमे।तौ दम्पती साम्राज्ये पट्टाभिषिक्तौ च बभूवतुः।

## १४.३. उपसंहारः

राजकुमारी व्यसनम् अविगणस्य सुखेन आसीत्।अत एव उच्यते-'अश्नुते हि स कल्याणं  व्यसने यो न मुह्यति' इति ।

**स्वावलोकनप्रश्नाः**

१.'व्यसने यो न मुह्यति 'इत्यस्य अभिप्रायः कः?

# १५.गुणवद्वस्तुसंसर्गात् यातिस्वल्पोपि गौरवम्

**संरचना**

१५.०. शीर्षिकायाः अर्थः
१५.१. शीर्षिकायाः अभिप्रायः
१५.२. संसर्गवशात् गौरवम् आप्ताः कतिपयदृष्टान्ताः
१५.३. संसर्गवशात् विकारम् आप्ताः कतिपयदृष्टान्ताः
१५.४. संसर्गवशात् गौरवम् आप्तानां कृते पौराणिकाः कतिपयदृष्टान्ताः
१५.५. भगवद्भक्तानां कतिपयदृष्टान्ताः
१५.६. उपसंहारः

## १५.०.शीर्षिकायाःअर्थः

स्वल्पः अपि = स्वयम् अल्पीयान् अपि पदार्थः जीवो वा ;गुणवत् = महिमोपेतस्य वस्तुनः; संसर्गात् = सम्बन्धवशात् ;गौरवम् = महत्त्वम् ; याति = प्राप्नोति इति शीर्षिकायाः अर्थः

## १५.१.शीर्षिकायाः अभिप्रायः

गुणहीनम् अपि द्रव्यं गुणवतो द्रव्यस्य सम्बन्धेन महिमानं भजते इति निर्गलितः अर्थः । अयं हि विषयः जडेषु, तिर्यक्षु, चेतनेषु अपि प्रत्यक्षं दृश्यते। यथा-

**पुष्पमाला अनुषङ्गेण सूत्रं शिरसि धार्यते',**
**अश्मा अपि याति देवत्वं महद्भिः सुप्रतिष्ठितः'** इति वा पूर्वोक्तस्य पूरणांशः ।

तथाहि– कार्पासः तन्तुः, स्वयं प्रियदर्शनः न भवति, अतःतं न कोऽपि कण्ठे, शिरसि वा धारयति। किन्तु सः एव तन्तुः पुष्पाणां मालाग्रथनकरणं भूत्वा तेषां सम्बन्धेन स्वयम् अपि तैः सह कण्ठे शिरसि, हस्तयोः वा ध्रियते, तथा हृदयहारिषु कामिनीजनचिकुरेषु देवताविग्रहेषु च अलङ्क्रियते, किं बहुना वासुदेवभूषिता वनमालाऽपि सूत्रसम्बन्धेनैव प्राधान्यम् उपगता।

## १५.२.संसर्गवशात् गौरवम् आप्ताः कतिपयदृष्टान्ताः

एवं जडभूता शिलाऽपि मन्त्रविद्भिः महात्मभिः शास्त्रविधिना प्रतिष्ठिता सती, पूजनीयतां प्राप्नोति।तथा पूजकानां मनोरथमपि पूरयति,स्वप्ने देवतारूपेण साक्षात्क्रियते,कदाचित् जाग्रत्- अवस्थायाम् अपि भगवद्रूपेण दृश्यते। शिलायां सन्निहितः अयम् अलौकिक-असामान्यमहिमा-मन्त्र- -वित्-प्रतिष्ठित-भगवत्-सर्गेण एव सञ्जातः इति निश्चप्रचम्।जपाकुसुमसान्निध्येन स्फटिकमणिः पद्मरागतां भजते ।

## १५.३. संसर्गवशात् विकारम् आप्ताः कतिपयदृष्टान्ताः

अत्र इदम् अवधेयम्।गुणवतः संसर्गेण यथा अल्पस्य महत्त्वं, एवं दोषवतःसंसर्गेण महतः अल्पत्वम् अपि सङ्क्रामति। अतः एव 'संसर्गजाः दोषगुणाः भवन्ति' इति वृद्धाः आमनन्ति। तथा हि - जगत् त्रयपवित्रीकरणपटुः पावकः लोहसंसर्गं प्राप्य मुद्गरैः हन्यते । रविकिरणसंयोगजन्य- सन्तापशमनदक्षः चन्दनतरुः यद्यपि आतपसन्त-प्तान् आकर्षति अथापिदुस्सह-विष-पूरित-रसना- वता भुजगेन परिवेष्टितः दूरात् एव परिहीयते।अयं हि दुष्टसंसर्गपरिणामः इति अनुक्तम् अपि ज्ञायते। किञ्च सुकवि-करकमल-संलग्न-लेखिनी-संसर्गं प्राप्य मषी रामकथा-निर्माण-पुण्यकार्यं तनो ति। सा एव कुकविकर-संबद्धा पापकथां निबध्नाति।अपि च भगवद्गुण-श्रवण-प्रवणस्य भक्त जनस्य सङ्गतिं प्राप्य कीरशेखरः रामनामोच्चारणेन सुखयति अन्तिकस्थं जनम्।दुर्जनपरिपालि तः सः एव शुकः दुरालापैः सन्तापयति।नलिनीदलसंस्थितः जललवः मुक्तामणिश्रियं दधाति, सः एव मृदि शिलायां वा पतितः नामरूपे जहाति।

## १५.४.संसर्गवशात् गौरवम् आप्तानां कृते पौराणिकाः कतिपयदृष्टान्ताः

अत्र विषये विचारणीया अन्ये अपि विशेषाः विद्यन्ते । यथा –

लोके क्षामसूचकः मूषकः धान्यादिभक्षणेन पटादि खण्डनेन च गृहस्थान् क्लेशयति। अथापि तेषां प्रभोः भगवतः गणाधिपस्य, करुणालोः विघ्नाद्रिभेदकुशलस्य वाहनं भूत्वा जनैः आराध्यते। अयं च बहुमानः महतः भूतस्य संसर्गसम्भूतः विशेषः इति न अविदितम् । किञ्च मारणास्त्रम् इव जनैः भयविह्वलदृष्टिभिः सुदूरं परिहीयमाणः फणी जगत् पितुश्शङ्करस्य भूषणतां प्राप्य जनता-घन-तापहरः इति मुक्तकण्ठं स्तूयते।सर्पाशनः गरुत्मान् अपि गोविन्द- चरणा- रविन्द -संसेवनेन अतिलोक महिमानं प्राप्य जीवलोकेन संस्तूयते ।

## १५.५.भगवद्भक्तानां कतिपयदृष्टान्ताः

प्राकृताः गो-गोप-गोपाङ्गनाः वसुदेवनन्दनस्य करुणा-कटाक्ष-संसर्गेण सम्मान्यताम् अभजन्त। इदं हि सर्वविदितं यत् - प्रह्लादो विभीषणश्च पिशिताशनकुले जज्ञतुः इति । अथ अपि एकः कल्याणगुणाकरस्य करुणामयस्य जगत्-अवनक्षमस्य नारायणस्य गुणकीर्तनसम्बन्धेन अन्यः विभीषणः मूर्तिमतः धर्मस्य,सर्वभूतसंरक्षकस्य साकेतपुराधीश्वरस्य श्रीरामचन्द्रस्य समाश्रयण सम्बन्धेन च निखिलजगत्-जेगीयमानपुण्यचरितौ, भक्तकुलालङ्कारौ बभूवतुः। पशुगणप्रविष्टःस्वभा- वचपलः हनुमान् कपिः अपि भगवत्-गुणानुरागसम्बन्धेन देवत्वम् अलभत। श्रीरामपादरजस्-सङ्गेन अहल्या शिलापि चैतन्यम् अवाप। अयःखण्डोऽपि पारदस्पर्शेन सुवर्णताम् अधिगच्छति। गोदुग्धम् अपि अम्लसम्बन्धेन वैरूप्यं प्राप्य दधि भवति।

## १५.६. उपसंहारः

एवं विधैः अनेकैः दृष्टान्तैः सुदृढम् अवगम्यते यत् -संसर्गवशाद् गुणः दोषः वा संक्रामति- इति। अतः सर्वप्रयत्नेन सज्जनसङ्गतिं सम्पाद्य जनाः आत्मनः योगं क्षेमं च भजेयुः ।

**स्वावलोकनप्रश्नाः**

१.संसर्गजाः दोषगुणाः भवन्ति - इत्यस्य अभिप्रायः कः?

२.गुणवद्वस्तु सम्पर्कात् के के गौरवं याताः ?

# १६. नहि कृतम् उपकारं साधवो विस्मरन्ति

**संरचना**

१६.०. शीर्षिकायाः अर्थः

१६.१. शीर्षिकायाः अभिप्रायः

१६.२. सतां स्वभावः-सम्पदश्च परोपकारायैव

१६.३. पौराणिकाः कतिपयकृतज्ञतापुरुषाः

१६.३.१कर्णस्य कृतज्ञता (महाभारतम्)

१६.३.२.सुग्रीवस्य कृतज्ञता (श्रीमद्रामाणम्)

१६.४. साधुजनानां विरलता

१६.५. उपसंहारः

## १६.०.शीर्षिकायाः अर्थः

साधवः = परोपकारपरायणाः सन्तः; कृतम् = विहितम्; उपकारम् = उपकृतिम्; न विस्मरन्ति = स्मृतिपथात् नैव अपनयन्ति; हि = खलु; इति शीर्षिकायाः अर्थः।

## १६.१.शीर्षिकायाः अभिप्रायः

लोके अस्मिन् साधवः, असाधवः इति द्विविधाः वर्तन्ते जनाः। सद्गुणविशिष्टाः सत्पुरुषाः साधवः, दुर्गुणसहिताः पुरुषाः असाधवः ।दुर्जनाः विनैव कारणं इतरान् पीडयन्ति। अयम् एतेषां स्वभावः।अतः एव अपकृतिप्रियाः हि नीचाः इति सूक्तम् । उपकृताः अपि ते उपकृतिं विस्मरन्ति, प्रत्युत अपकारकरणे न सन्दिहन्ते।

## १६.२. सतां स्वबावः—सम्पदश्च परोपकारायैव

किन्तु साधवः पुरुषाः सदा सन्मार्गगामिनः इतरेषां न हानिं कुर्वन्ति, किञ्च उप- कारकाः भवन्ति।अयाचिताः एव उपकुर्वते । तेषां सम्पदः परोपकाराय एव भवन्ति। तदुक्तम् –

**परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः ।**
**परोपकाराय दुहन्ति गावः परोपकाराय सतां विभूतयः ।।**

इति वृक्षाः,नद्यः,गावः,अपि विना याचनां परोपकारं कुर्वन्ति इत्युक्तौ कः सन्देहः सज्जनानां मान- वानां विषये?अपि च ते साधवः कृतम् उपकारं स्वल्पम् अपि न

कदापि विस्मरन्ति,विशिष्य अप- कारकारिणे उपकारम् एव कुर्वन्ति।अयम् एषां विशिष्टः गुणः, यत् परकृतम् उपकारम् अल्पम् अपि अनल्पं सम्भाव्य सभामुखे कृतज्ञतां प्रकटयन्ति।स्वकृतं महान्तम् अपि उपकारं प्रसङ्गवशेन अपि न उद्घाटयन्ति यतः ते न अनुमन्यन्ते आत्मश्लाघाम्। सज्जनानां दृष्टिः सुविशाला। प्रप- ञ्चजनताम् एककुटुम्बत्वेन ते सम्भावयन्ति। धर्मराजः इव अजातशत्रवः ते स्वपरभेदम् उत्सृज्य सततम् उपकारकारिणः भवन्ति। अन्यैः उपकृताः साधवः स्वार्थम् अपि अविगणय्य आमरणं तस्य उपकारकाः जीवितं यापयन्ति।

## १६.३.पौराणिकाः कतिपयकृतज्ञतापुरुषाः

अस्मिन् विषये साधुजनस्वभावः बहुधा उपवर्णितः अस्माकं पुराण-इतिहासकाव्येषु। अस्य उदाहरणानि श्रीमन्महाभारतेतिहासे रामायणे बहवः उपलभ्यन्ते।

### १६.३.१.कर्णस्य कृतज्ञता (महाभारतम्)

महाभारते प्रसिद्धः कर्णः यद्यपि कुन्तीपुत्रः, तथापि पाण्डवेषु न गण्यते। विवाहात् पूर्वं कुन्ती दूर्वाससः महर्षेः कतिचन मन्त्रान् अधिगत्य एकदा भगवन्तम् आदित्यं मन्त्रबलेन आहूत- वती। भगवान् सूर्यः समागत्य तस्याः पुरतः प्राह-' कन्ये किं त्वं वाञ्छसि' इति।किमपि प्रष्टुम् अजानन्ती सा अवोचत् 'त्वत्समं पुत्रम्' इति। सूर्यः प्रसन्नः 'तथास्तु'इति अवादीत्।सद्यः एव सा सुन्दरं कुमारं सुषुवे।तं दृष्ट्वा संतुष्टापि सा लोकापवादभयेन शिशुं पेटिकायां निक्षिप्य गंगायां तत्याज।सः बालकः प्रवाहेण सुदूरं नीतः धृतराष्ट्रस्य सारथिना अतिरथनामकेन दृष्टः स्वगृहं प्रापितः। अनपत्या तस्य जाया राधा तं प्रेमातिशयेन पोषयामास। सः एव कर्णः इति प्रसिद्धः।

एषः कर्णः दुर्योधनेन आदृतः अङ्गराज्ये अभिषिक्तः।एवं उपकृतः कर्णः सुयोधनस्य कृतज्ञः भूत्वा स्वप्राणान् अपि अर्पितवान् युद्धे।श्रीकृष्णः तं पाण्डवपक्षे समाक्रष्टुं सुमहत् प्रयत्नम् अकरोत्। तत्- जन्म-रहस्यम् अखिलम् उपवर्ण्य कृष्णः कुरुराज्याभिषेकादिभिः बहुधा तं लोभयामास। सर्वं जन्म- वृत्तान्तं श्रुत्वापि कर्णः न चचाल। राधा-अतिरथौ एव स्वपितरौ भावयन् कृतम् उपकारम् अविस्मृत्य मित्रं दुर्योधनम् अनुससार। साधुः कर्णः दुर्योधनस्य उपकारं संस्मृत्य अधिकारं च तृणी-कृतवान्।

### १६.३.२.सुग्रीवस्य कृतज्ञता (श्रीमद्रामाणम्)

एवमेव रामायणे वालिना निष्कासितः सुग्रीवः ऋष्यमूकपर्वते अटन् सीतान्वेषणपरं श्रीरामं सलक्ष्मणम् अपश्यत्।सोदरं वालिनं हन्तुकामः सः रामस्य सहायं प्रार्थयत।तस्य प्रार्थनाम् अङ्गी- कृत्य रामः वालिनमवधीत्। इत्थं श्रीरामेण उपकृतः सुग्रीवः तस्य कृतज्ञः अभवत्। ततः सीता- न्वेषणे रावणवधे च रामस्य सहायकः भूत्वा सुग्रीवः एवं स्वकृतज्ञतां निवेदितवान्।

## १६.४ साधुजनानां विरलता

एवम् एव साधुजनाः कृतम् उपकारं न कदापि विस्मरन्ति। एतादृशानां साधूनां संख्या अत्यल्पा अस्ति। ते अपि सामान्यजनवत् प्रवर्तन्ते। किन्तु विशिष्टगुणैः भूषिताः दृश्यते। लवणस्य कर्पूरस्य च वर्णः समानः। किन्तु आस्वादेन तयोः भेदः यथा। अवगम्यते तथा एव पुरुषेषु पुण्य- पुरुषाः साधवः ज्ञायन्ते। अपि तु न शक्यं वक्तुं साधुजनाः सर्वत्र स्युः इति। कुत इति चेत् –

**शैले शैले न माणिक्यं मौक्तिकं न गजे गजे ।**
**साधवः न हि सर्वत्र चन्दनं न वने वने ।।**

यद्यपि माणिक्यस्य उत्पत्तिः पर्वते एव भवति तथापि तत् न भवति प्रतिपर्वतम्। तथा एवमुक्ताः केषुचित् एव गजेषु स्युः। चन्दनम् अपि प्रतिवनं स्यात् इति वक्तुं न शक्यम्। एवं प्रकारेण साधवः अपि सर्वत्र न उपलभ्यन्ते।यतः अनर्घस्य वस्तुनः उत्पत्तिः विरला खलु।

## १६.५.उपसंहारः

जन्तुषु अपि केचन साधवः सन्ति। ते कृतम् उपकारं न विस्मरन्ति। स्वल्पाहारदानेन अपि शुनकः सदा कृतज्ञः यजमानस्य विश्वासपात्रं भवति। इत्थं साधवः मानवाः पशुपक्ष्यादयश्च कृतम् उपकारं न विस्मरन्ति।

*निबन्धः*

**स्वावलोकनप्रश्नाः**

१.कर्णः कथं कृतज्ञता पुरुषः जातः ?

२.साधवः सर्वत्र कथम् इव न लभ्यन्ते ?

# १७.सम्पत्तौ च विपत्तौ च महतामेकरूपता

**संरचना**

१७.०. शीर्षिकायाः अर्थः
१७.१. शीर्षिकायाः अभिप्रायः
१७.२. अधर्मपथावतरणम्
१७.३. प्रकृत्या वामचाराः केचित्
१७.४. मनवानां चित्तशुद्धिपरीक्षाः आपदः
१७.५. हरिश्चन्द्रकथा
१७.६. बहुविधास्सम्पदः
१७.७. उपसंहारः

## १७.०.शीर्षिकायाः अर्थः

सम्पत्तौ = सम्पत्सु सत्सु, सम्पन्नकालेषु सुखसन्तोषादिषु; विपत्तौ = विपत्सु सत्सु विपन्नकालेषु कष्टेषु नष्टेषु; च = अपि; महताम् = धीराणाम्; एकरूपता = अविकृतमनस्कतैव, प्रवर्तनम् एकविधम् एव (भवति) इति शीर्षिकायाः अर्थः।

## १७.१.शीर्षिकायाः अभिप्रायः

हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धः श्यामिकाऽपि वा' इति हि सुभाषितम्। हेम्नो गुणदोषौ विवेचयितुम् अग्निः इव मानवानां गुणशीले निश्चेतुम् आपदः निकषोपलाः। आपत्सु प्रायः सर्वेषां मनांसि विकारम् आपद्यन्ते एव।केचन सम्पत्तौ अपि मग्नन्तः विकुर्वते।विकारहेतौ सम्पत्तौ विपत्तौ च येषां मनांसि न विक्रियन्ते ते एव धीराः महात्मानः इति लोकोक्तेः अर्थः ।

## १७.२.अधर्मपथावतरणम्

प्रायः सर्वः अपि धर्मेण एव पथा जीवितम् अतिवाहयितुम् इच्छति। यावान्कालः सुखेन गच्छति तावत्पर्यन्तं सत्यधर्मौ न अतिक्रामति,प्रबोधयति च। यदा हि विपत्तयः अभिभवन्ति तदा सत्यधर्मः दूरीकुरुते। असत्यम् अधर्म्यं च पन्थानम् आस्थाय सुखेन विपदं तरितुम् इच्छति। 'धर्मो- रक्षति रक्षितः'इति सूक्तिं नाभिजानाति। जानन् वा न तत्र मनः कुरुते। यद्यपि कोऽपि कदाचित् अधर्म्येण पथा गच्छन् विजयं प्राप्नुयात्

तथाऽपि स स्वकृतं निन्द्यं कर्म अवगूहितुं असत्यं सत्यम् इति,अधर्म्यम् धर्म्यम् इति च बहुधा विप्रलभेत। तत् इदम् अनर्थपरम्परायाः द्वारं भवति। अन्ते च पश्चात्तप्तचित्तः सत्यधर्मः पुनः शरणं प्रपद्यते ।

## १७.३. प्रकृत्या वामचाराः केचित्

केचित् आपद्-अनभिभूताः अपि कष्टम् अजानन्तः, ते सम्पन्नाः अपि प्रकृत्या वामाचाराः भवन्ति। ते च नररूपाः एव राक्षसाः इत्युच्यन्ते। असति च विकारहेतौ सर्वे अपि धार्मिकाः शील- वन्तश्च भवन्तु, तत्र न कोऽपि विशेषः स्यात्।आपदश्च अभिभूय यो हि निर्विकारः तिष्ठति सः एव प्रशंसायाः पात्रं भवति, न अन्यः।

## १७.४. मनवानां चित्तशुद्धिपरीक्षाः आपदः

मानवानां चित्तशुद्धिपरीक्षार्थम् आपदः भगवता कल्प्यमानाः इत्यभियुक्तनाम् उक्तिः। अत्र परीक्षासु उत्तीर्णाः विजयिनः एव भगवत्-अनुग्रह-पात्रतां भजन्ते। अनुत्तीर्णाश्च विषमपदम् अधर्म्यपथम् अवलम्बमानाः पदे पदे स्खलन्तः क्रमेण अधः पतिताः इह-पर-गतिदूराश्च भवन्ति। अमुम् एव अर्थं महाकविः कालिदासः स्वकीये कुमारसम्भवे- '**विकारहेतौ सति विक्रियन्ते येषां न चेतांसि ते एव धीराः** 'इति सूक्तिमुखेन व्याचष्टे। धीराः नाम पण्डिताः ध्यानशीलाः क्रियावन्तो युक्तायुक्त- विचक्षणाः विवेकिनः इत्यर्थः।

## १७.५.हरिश्चन्द्रकथा

एवं सम्पत्तौ च विपत्तौ च विकारम् आनापन्नाः महान्तः राम-हरिश्चन्द्रादयः लोकसन्नुताः बहवः पुराणादिषु श्रूयन्ते।प्रकृते हरिश्चन्द्रकथा अत्र प्रस्तूयते।

हरिश्चन्द्रः नाम धार्मिकः सत्यशीलः राजा आसीत्। सम्पत्तौ अपि एषः नैव विकृतिम् आपद्यत। न कदापि सत्यात् धर्मात् च अतिक्रान्तं तस्य चित्तम्। विश्वामित्रः राजर्षेः अस्य सत्यनिष्ठां विश्लथयितुं बहुधा प्रायतत। प्रथमतः एनं राज्यात् निष्कासयामास। सभार्यापुत्रस्य अस्य बहुलायासप्रायं वनवासं विदधौ। तत्र निराहारस्थितिम् अपि कल्पयामास। भार्यापुत्रौ च विक्रापयामास। अन्ते च राज्ञः अपि तस्य पराधीनवृत्तिं नीचसेवां च कल्पयामास। तथापि इयं राजा कूटस्थः इव अविचलितः सत्यनिष्ठः आदर्शप्रायश्च तस्थौ ।

अत्र अयं विशेषः।विश्वामित्रश्च एतत् परीक्षां न अकरिष्यत् तस्य राज्ञः विशुद्धा सत्यनि -रतिः न उदगमिष्यत्; सः राजा लोकप्रसिद्धिं च न अभजिष्यत। अतः आपदः अपि भङ्ग्यन्तरेण महान्तम् उपकारं कुर्वन्ति। आत्मनः उत्तमगुणान् बहुमुखं प्रकटीकृत्य महतीं कीर्तिम् आवहन्ति।

## १७.६ बहुविधास्सम्पदः

सम्पत्तयः च बहुविधाः उदाह्रियन्ते। यथा विद्या-विनय-विवेक-सम्पत्तिः शम-दम-आदि गुण-सम्पत्तिः, पशु-पुत्र-धनादि-सम्पत्तिः इत्यादिः। सर्वाः अपि एताः श्रेयो विदधति। किन्तु इतरे- तराश्रयमूलाः सत्यः एव शोभन्ते। तथाहि-बहुधा विद्यासम्पद्-विलसितः अपि विनय-विवेक-सम्पद्- विरहितः विद्याफलं नैव भुनक्ति। अप्रतिष्ठश्च दुःखानि अनुभवति। विशालकुलसम्पन्नाः पशु-पुत्र- धनादि-सम्पद्-महिताः अपि विद्या-विनय-विवेकरहितास्तु निर्गन्धाः किंशुकाः इव नशोभन्ते। किञ्च सत्याम् अपि तपस्सम्पत्तौ शम-दम-आदिगुणसम्पद्-विहीनाः सन्तः बहुधा विप्रकृष्टचित्ताः भूत्वा तपःफलं नैव आदातुं प्रभवन्ति। एवञ्च सर्वापेक्षया विद्या-विनय-विवेक-शम-दम- आदिगुण- सम्पत्तयः अत्यन्तं प्रधानाभूताः इति लक्ष्यते। अन्यथा विद्यादिसम्पत्तिदूराः अन्याः सर्वाः सम्पदः आपदाम् एव मूलम्। आपदश्च अग्निपरीक्षाकल्पाः इत्युक्तम् एव। तां च परीक्षाम् उत्तरितुं विद्या- विनय-विवेकादि-गुणसम्पत्तयः एव शरणम् अस्माकम्।

## १७.७.उपसंहारः

अतः सम्पत्तौ च विपत्तौ च एकरूपतां प्राप्तुं महानुभावतां च आधातुं सर्वैः विद्या-विनय- विवेक-शमदमादिगुणसम्पत्तिः अवश्यं अनुसरणीया भवति।

**स्वावलोकनप्रश्नाः**

१.कीदृशी सम्पत्तिः प्रधानभूता ?

२.आपदः किमर्थं कल्प्यन्ते इति अभियुक्तोक्तिः कथयति ?

# १८. संस्कृतभाषाप्रचारोपायाः

**संरचना**

१८.०. शीर्षिकायाः अर्थः
१८.१. शीर्षिकायाः अभिप्रायः
१८.२. प्रभुत्वपराः प्रचारोपायाः
१८.३. स्वच्छन्दसंस्थानां प्रचारोपायाः
१८.४. संस्कृतस्य सारल्यतासाधकाः प्रचारोपायाः
१८.५. नूतनसाहित्यस्य (निर्माणद्वरा)प्रचारोपायाः
१८.६. मेलनात्मकाः प्रचारोपायाः
१८.७. संस्कृतज्ञानां प्रोत्साहनम्
१८.८. केचन अन्ये प्रकाराः
१८.९. उपसंहारः

## १८.०. शीर्षिकायाः अर्थः

संस्कृतभाषा = देववाण्याः; प्रचार = विस्तरणस्य; उपायाः = मार्गाः इति शीर्षिकायाः अर्थः।

## १८.१. शीर्षिकायाः अभिप्रायः

संस्कृतभाषायाः महत्वं, तस्याः प्रचारस्य आवश्यकता च, स्वतन्त्रे भारतदेशे सर्वैः अपि जनैः अङ्गीक्रियते। अनेकाः संस्थाः, संस्कृतभाषाभिमानिनः कतिचन सज्जनाः विद्वांसः च अपि व्यक्ति- गतरूपेण संस्कृतप्रचारार्थं सकटिबद्धं प्रयत्नशीलाः संदृश्यन्ते। परन्तु अस्यां दिशि विशिष्टं कर्म क्रियमाणं न दृश्यते। देववाण्याः प्रचारः अवश्यं कर्तव्यः इति निस्संशयं प्रतिभाति। अतः केचन उपायाः सूच्यन्ते। तेषु -

## १८.२. प्रभुत्वपराः प्रचारोपायाः

सर्वप्रथमं अनुसरणीयः उपायस्तु विद्यालयेषु प्राच्य-पाश्चात्य-भाषाबोधकेषु संस्कृतस्यअव- श्यपाठ्यत्वं सम्पादनीयम्। भारतीयेषु सर्वेषु प्रान्तेषु राज्यशासकैः संस्कृतविद्यायाः कृते अभिज्ञस्य अध्यक्षस्य पार्थक्येन नियोजनं कृत्वा सः राज्य-संस्कृतशिक्षाविभागस्य पर्यालोचनाधिकारी कर्तव्यः। संस्कृतविद्यालयेषु अध्ययनं

कृत्वा तेभ्यः निर्गतानां स्नातकानां विद्यालयान्तरेषु अन्यैः अध्यापकैः साकं तारतम्यं विना अध्यापकपदेषु नियोगः कर्तव्यः।संस्कृताध्यापकानां कृते शिक्षणालयाः स्थापनीयाः।

## १८.३.स्वच्छन्दसेवासंस्थानां प्रचारोपायाः

अस्मिन् एव समये संस्कृतभाषायां परिचयं, विज्ञानं च अधिगन्तुं उपयुक्तानि पुस्तकानि कानिचित् आंग्लभाषामयानि, आधुनिक-नवीन-विषयाणां विज्ञापकानि संस्कृते अनूद्या वा, संस्कृत मौलिकानि वा, निर्माय वा तेषां परिचयः संस्कृतच्छात्रेभ्यः दापनीयः। तादृशपुस्तकानां निर्माणार्थं सर्वेषु प्रान्तेषु प्रत्येकं योग्यविदुषां समितयः नियोज्याः। प्रतिग्रामं विदुषां मुखेन पुराणानां प्रवचनं कारयित्वा पुराणेषु विराजमाना भारतीयसंस्कृतिः साधारणजनेभ्यः परिचिता कर्तव्या।संस्कृत विद्व त्सु परस्परं विद्यमानं योग्यतायाः,अवस्थायाश्च भेदभावं विस्मृत्य सर्वेषाम् अपि संस्कृतज्ञानां समा नं सम्मानं कर्तव्यम्। संस्कृतपाठशालासु च विद्यमानानां अध्यापकच्छात्रगणानां परस्परं सौहार्दं सम्पाद्य सर्वैः अपि मिलित्वा संस्कृतस्य अभिवृद्धये प्रयत्नशीलैः भाव्यम्। अस्मिन् समये संस्कृत विद्यालयेषु विद्यार्थिनां संख्यायाः अतीव ह्रासो दृश्यते। प्रतिवर्षं ह्रासस्य अधिकता अनुभूयते। अतः तन्निरोधार्थं छात्रेषु संस्कृतभाषायां रुचिः उत्पादनीया। यदि तैः साकं नित्यव्यवहारेषु भोजनालयेषु क्रीडांगणेषु च प्रान्तीयभाषया साकं संस्कृतेनापि व्यवहारं कर्तुं अध्यापकैः प्रयत्नः साध्येत, तर्हि छात्राणां तस्यां भाषायां रुचिः उत्पाद्येत। अस्यां दिशि पंडितैः प्रयत्नः कर्तव्यः।तत्र तत्र स्थानेषु विद्यालयेषु च अध्यापकाः छात्राश्च साप्ताहिकी वा,पाक्षिकी वा संस्कृतवाग्वर्धनार्थं सभा प्रचालयि तव्या।तासु सभासु प्रान्तीयभाषाद्वारा वा संस्कृतभाषाद्वारा वा संस्कृतभाषायाः प्राशस्त्यं,सौलभ्यं च सर्वजनेभ्यः निवेदनीयम्।कीदृशानां पुस्तकानां पठनेन संस्कृते परिचयः वर्धेत इति सूचयितुं तादृ शानां पुस्तकानां सूची जनेभ्यः दातव्या।

## १८.४.संस्कृतस्य सारल्यतासाधकाः प्रचारोपायाः

सुलभसंस्कृतभाषायां व्याख्यानकरणे समर्थानां पण्डितानां सम्भाषणादिकं प्रायःनियोज्यम्। संस्कृतज्ञानां संस्कृताभिमानवतीनां च महिलानां संस्कृतमहिलासम्मेलनाभिधं किञ्चित् सदःनिर्माय महिलाद्वारा संस्कृतप्रचारः कर्तव्यः। भारतीय-संस्कृतिप्रचारकसंस्थाद्वारा संस्कृतप्रचारः अवश्यं कर्तव्यः इति अनुरोधः कर्तव्यः। प्रान्तीयभाषाविद्यालयेषु आंग्लभाषाविद्यालयेषु च संस्कृताध्यापकच्छात्रैः काचन संस्कृत-परिषद् निर्माय तद्द्वारा तत्रत्याः संस्कृतेतराः अध्यापकाः संस्कृताभिज्ञाः कार्याः।

स्वकुटुम्बेषु संस्कृतविद्वांसः विद्यार्थिनश्च यावत्साध्यं बन्धुभिः साकं सरलसंकृतवाक्यैः व्यवहारं कुर्युः। सरलतया ज्ञायमानानि एव संस्कृतपदानि वाक्यानि च विद्वद्भिः प्रयोज्य ततः छात्राणां सा मान्यजनानां च तस्यां रुचिः उत्पादनीया। सुदीर्घसमासानां प्रयोगः न कर्तव्यः।भाषायाः प्रौढीकर- णेन तदध्ययने सामान्यजनस्य उद्वेगः भवेत्। असमस्तेषु अपि सुलभसंस्कृतपदेषु सन्धेः काठिन्यं न कार्यम्।सुलभसंस्कृतपरीक्षाः प्रचालयितव्याः। तदुपयोगीनि च पुस्तकानि लेख्यानि।वयोऽधिका नां कृते संस्कृतरात्रिपाठशालाः स्थापनीयाः। तदर्थं पाठ्यग्रन्थाः अपि निर्मेयाः। ग्रामे ग्रामे गृहस्थ- पण्डितैः संस्कृतपाठशालाः प्रचालनीयाः। तासु बालकाः बालिकाश्च अध्यापनीयाः।

## १८.५.नूतनसाहित्यस्य (निर्माणद्वरा)प्रचारोपायाः

कथावाचनद्वारा प्रवचनानां च द्वारा पण्डितैः स संस्कृतप्रचारः कर्तव्यः। संस्कृतनाटकानां रूपकाणां च,अभिनयं कृत्वा तद्द्वारापि सामान्यजनेषु तद्भाषां प्रति रुचिः उत्पादनीया। सुलभसं- स्कृतमयानि राष्ट्रीयगीतानि निर्माय सर्वेषु राज्येषु राष्ट्रीयतायाः प्रचारः कर्तव्यः। आधुनिकसाहि- त्यस्य अपि ग्रन्थाः संस्कृते लेखनीयाः। तद्द्वारा लघुकथाः गेयकाव्यानि इत्यादिकेषु विषयैषु छात्राणां रुचिः उत्पादनीया। विज्ञानशास्त्रीयाणां ग्रन्थानां अनुवादः सुलभसंस्कृते कार्यः।

## १८.६. मेलनात्मकाः प्रचारोपायाः

संस्कृतकवीनां सम्मेलनानि प्रतिमासं कृत्वा जनसामान्ये संस्कृतकवितायां रुचिः उत्पाद- नीया। कालिदासादिकाव्यानां परिचयः सुलभसंस्कृते लिखित्वा बहुमूल्यस्य साहित्यभण्डारस्य सामान्यजनेषु प्रचारः कर्तव्यः। व्यास-वाल्मीकि-कालिदासादीनां महाकवीनां देशे सर्वत्र जन्मोत्सवान् कृत्वा तद्द्वारा तेषां कवीनां प्रभावः प्रचारपदं नेयः।

## १८.७.संस्कृतज्ञानां प्रोत्साहनम्

संस्कृते ग्रन्थलेखकानां प्रोत्साहं दत्वा तेभ्यः पुरस्कारादिकम् अपि दापनीयम्।प्रचारपदं अनधिरूढानाम् उत्तमसंस्कृतग्रन्थानाम् अध्ययन-अध्यापनद्वारा प्रचारस्साधनीयः।संस्कृतविदुषां संस्कृतसेवकानां च सम्माननं कृत्वा तद्द्वारा तेषां उत्साहः सहयोगाश्च देयः। संस्कृते बालकानां कृते वाद-विवादसभाः प्रचालयितव्याः।

तेषां पुरस्काराश्च देयाः। संस्कृतप्रचारार्थं प्रान्तीयभाषाणां साप्ताहिकीः पाक्षिकीः मासिकीः वा पत्रिकाः प्रकाश्य संस्कृतानभिज्ञेभ्यः तत्परिचयः देयः संस्कृत विदुषां महाकवीनां च चित्राणि ग्रन्थालयेषु,पठनालयेषु, अन्येषु च प्रजास्थानेषु स्थापयित्वा तेषां परिचयः सामान्यजनेभ्यः दातव्यः।

## १८.८.केचन अन्ये प्रकाराः

देशे सर्वत्रापि राज्यशासने अधिकारिणः, रक्षणशाखायाम् अधिकारिणः, विश्वविद्यालयेषु आचार्याः, कुलपतयः, उपकुलपतयः, चिकित्सकाः, इत्येवमादयः बहवः जनाः संस्कृतं किञ्चित् जानन्ति वा तदनुरागिणः च वा भवन्ति। संस्कृतविद्वद्भिः प्रचारकैः च तेषां सङ्घटनं, सङ्ग्रहं, परिचयं च सम्पाद्य संस्कृतप्रचारार्थं तादृशानाम् अपि संस्कृतानुरागिणां सहयोगः सम्पादनीयः। संस्कृतानभिज्ञाः पुरोहिताः वेदाध्यायिनः देवालयार्चकाश्च संस्कृताध्ययने प्रोत्साहितव्याः। अस्माकं देशस्य नेतृगणश्च संस्कृताभिमानी कार्यः।तैः एव हि सामान्यजनः नीयते। इस्लाम् मतानुयायिनः क्रिस्तुमतानुयायिनः च संस्कृताभिज्ञाः कर्तव्याः।तथा कृत्वा तेषां हृदयेषु भारतीयत्वं संस्थापनीयम् संस्कृताध्यपकानां समुचितं वेतनं दापयितुं राज्यशासनात् सहायताप्राप्त्यर्थं प्रयत्नः प्रचारकैः कर्तव्यः। देवालयेषु अन्येषु च धार्मिकस्थानेषु संस्कृतस्य प्रचारः कर्तव्यः। तत्संस्थानां धनम् अपि संस्कृतस्य प्रचारार्थम् अध्यापनार्थं च विनियोज्यम्, तदर्थं प्रयत्नः प्रचारकैः कार्यः। उच्चकोटिकैः संस्कृतविद्वद्भिः संस्कृतप्रचारार्थं देशे भ्रमणं कर्तव्यम्। विदेशेषु अपि संस्कृतप्रचारः कर्तव्यः। यावत्-शक्यं सर्वजनसुज्ञेयानि एव संस्कृतपदानि प्रयोज्य प्रचारः कर्तव्यः।उदाहरणतया जल-सूर्या-दिसाधारणशब्दान् विसृज्य पाण्डित्यप्रकटनार्थं कबन्ध-विकर्तनादिशब्दाः न प्रयोज्याः। तादृशाः सामान्यजनदुर्बोध्याः भवन्ति।

## १८.९.उपसंहारः

एवंविधैः अन्यैः च अनेकैः उपायैः सामान्यजनेभ्यः संस्कृतभाषा सुबोध्या कर्तव्या। एतदन्ये च यदि केचन उपायाः स्युः, तर्हि पणडिताः तान् प्रकाशयन्तु इति सविनयं विज्ञापयामि।

*निबन्धः*

**स्वावलोकनप्रश्नाः**

१.संस्कृतप्रचाराय वैयक्तिकः प्रचारः कः ?

२.संस्कृतप्रचाराय विद्यार्थिभिः किं अनुष्ठातव्यम् अस्ति ?

# १९. धनमूलमिदं जगत्

**संरचना**


१९.०.शीर्षिकायाः अर्थः

१९.१.शीर्षिकायाः अभिप्रायः

१९.२.निर्धनिनः दुरवस्था

१९.३.धनस्य प्रामुख्यम्

१९.४.धनस्य प्रभावः

१९.५.धनस्य संरक्षणम्

१९.६.उपसंहारः


## १९.०.शीर्षिकायाः अर्थः

इदम् = पुरतः दृश्यमानम्; जगत् = सर्वं प्रपञ्चम्; धनमूलम्, धन = वित्तम् एव; मूलम् = हेतुकम्; इति शीर्षिकायाः अर्थः।

## १९.१.शीर्षिकायाः अभिप्रायः

इदं च आभाणकं वाल्मीकिरामायणे विराजते। लक्ष्मणः श्रीरामचन्द्रं प्रति वदति -

**धनम् आर्जय काकुत्स्थ ! धनमूलम् इदं जगत्।**
**अन्तरं न अभिजानामि निर्धनस्य मृतस्य च।।**

इति। सत्यं निर्धनानां मृतानां च साम्यं दृश्यते लोकवृत्तेषु अस्माभिः। अतः एव निर्धनः मृतः च एकरूपौ इति व्यवह्रियेते। लोके चराचरवस्तुषु धनम् इव प्रधानं स्थानम् अधितिष्ठति। विना धनेन किमपि कार्यम् ऐहिकम् आमुष्मिकं वा साधयितुं न पारयामः वयम्। प्रातः आरभ्य आनिशम्,जननम् आरभ्य आमरणं धनम् एव सर्वस्य अपि निदानम् इति शीर्षिकायाः अभिप्रायः।

## १९.२.निर्धनिनः दुरवस्था

अन्यत् च पश्यामः वयं यत् सङ्घे तु धनहीनं मानवं न बहु मन्यन्ते। अर्थहीनं पुरुषं बान्धवाः अपि दूरीकुर्वन्ति। निर्धनं पुत्राः अपि मत्पिता अस्मदर्थम् अधिकं धनं न सम्पदया मास- इति दूषयन्ति। भार्या अपि न अनुसरति वित्तहीनं पतिम्। एवं धनस्य आवश्यकतां को वा सर्वेषु कालेषु समस्तेषु च न अनुमोदते।

## १९.३.धनस्य प्रामुख्यम्

अपि च प्रापञ्चिककार्यविमुखाः महात्मानः सर्वसङ्गपरित्यगिनः अपि सर्वत्र अट्यन्ते वित्तवाञ्छया। किमुत प्रापञ्चिकधर्मानुगतारिक्ताः मानवाः। चतुर्षु पुरुषार्थेषु धर्म-अर्थ-काम -मोक्षा- ख्येषु अर्थस्यैव प्रामुख्यं पश्यामः। अर्थम् एकं कारणीकृत्य एव अन्ये पुरुषार्थाः चरितार्थाःभवन्ति। विना च अर्थेन धर्म-कामयोः अनुष्ठानस्य एव असम्भवात्। अतः अर्थमूलं जगत् इति सुनिश्चितः विषयः। अर्थवान् रूपहीनः अपि सुन्दरो दृश्यते। कुलहीनः अपि कुलीनः गण्यते। अपण्डितः अपि पण्डितः भाव्यते। एवं परिपाटी सर्वत्र अनुभूयते अस्माभिः।

## १९.४.धनस्य प्रभावः

अथ च, केचित् धनलुब्धाः, आजन्मप्राप्तं स्वीयं सम्प्रदायम् अपि दूरीकुर्वन्ति। अन्ये च धनवाञ्छया धैर्य-औदार्य-गाम्भीर्यादीन् उत्तमगुणान् अपि अधः पातयन्ति। अन्ये च अर्थैकदासाः,सु- कृतविशेषोपपन्नम् अत्युत्तमं शीलम् अपि नाशयन्ति। एवंविधाः धर्मापेतबुद्धयःयेन केन अपि उपायेन वित्तार्जनम् एव परमं धर्मं मन्यन्ते। अपि च एकेन वित्तेन सकलार्थसाधकेन, न तुलाम् आरोहन्ति धर्मादयः निस्साराः इति सिद्धान्तीकुर्वन्ति च। एवं वित्तस्य सम्पादनमनिवार्यं परिदृश्यते। ततश्च, सभासु गौरवं,राज्यशासने उच्चस्थानप्राप्तिः,सङ्घे च महती कीर्तिः,इत्यादयः धनेन एव सम्पा- दयितुं सुलभाः इति पश्यामः। अतः भवति अन्यस्य कस्यापि नैतादृशं प्राबल्यं धनात् ऋते, लोके।

## १९.५.धनस्य संरक्षणम्

परन्तु,स्मृतिकर्ता मनुः आह -

**अर्थानाम् आर्जने दुःखम्, आर्जितानां च रक्षणे।**
**आये दुःखम्, व्यये दुःखम्, धिगर्थाः दुःखभाजनम्।।' इति।**

यद्यपि धनस्य सम्पादने श्रमः सञ्जायते। सम्पादितानां संरक्षणे कष्टं परिदृश्यते। तेषाम् अभिवृ- द्धिकरणे ततः अपि बाधा अनुभूयते। किं च विनाशे तु आर्जितस्य वित्तस्य प्राण-उत्क्रान्ति-दुःख -सदृशं दुःखं सम्पद्यते। अतः धनं सर्वथा दुःखभाजनं भवति। तेन अर्थाः निन्द्याः भवन्ति इति एतद्-वचनस्य मुमुक्षुविषये वा, अशक्तविषये वा तात्पर्यम् अपगच्छामः। एवं च जगत्-उपयोगि धनं सम्पाद्यताम्।

## १९.६ उपसंहारः

तद्व्ययः परं,धर्मात् अनपेतेन पथा क्रियताम्। धनानां व्ययः त्रिधा सम्पद्यते।एकः व्ययः, धनस्य अर्थिसात्कारणात्,अपरः व्ययः भोगः, अन्यश्च व्ययः नाशः इति। अतः सम्पदितानाम् अर्थानां दानेन गतिः उत्तमा, आत्मभोगेन मध्यमगतिः, चोराद्यपहरणेन गतिः अधमा च संभवति। अतः धनस्य त्याग-भोगौ यः न करोति तस्य धनस्य तृतीया गतिः अर्थात् नाशः भवति। अत्र स्मरामः अभियुक्तवाक्यम् -'चत्वारः धनदायादाः धर्म-अग्नि-नृप-तस्कराः ।

**तेषां ज्येष्ठावमानेन त्रयः कुप्यन्ति सोदराः** इति अतः मानवैः अर्थसम्पादनपरैः भाव्यम्। अर्थवद्भिश्च धर्म-दानशौण्डैः च भाव्यम् ।

**स्वावलोकनप्रश्नाः**

१.धनदायादाः कति?के च ते ?

२.धनव्ययः कतिधा भवति ? तेषां स्वरूपं किम् ?स्वभावश्च कः ?

# २०.कर्तव्यमेव कर्तव्यं प्राणैः कण्ठगतैरपि

**संरचना**

२०.०. शीर्षिकायाः अर्थः
२०.१. शीर्षिकायाः अभिप्रायः
२०.२. कर्तव्यम् - धर्मः
२०.३. काव्यस्य कर्तव्यताबोधनपद्धतिः
२०.४. विद्यार्थिनाम् उपयोगाय कतिपयकर्तव्यांशानां ज्ञापनम्
२०.५. महनीयतायाः साधनम्
२०.६. मनवाभ्युदयकरांशानां बोधनम्-आत्मनः गुणाष्टकस्य बोधनम्
२०.६.१. मनवाभ्युदयकरांशानां बोधनम्-दया
२०.६.२. मनवाभ्युदयकरांशानां बोधनम्-क्षमा
२०.६.३. मनवाभ्युदयकरांशानां बोधनम्-असूया
२०.६.४. मनवाभ्युदयकरांशानां बोधनम्-अकार्पण्यम्
२०.६.५. मनवाभ्युदयकरांशानां बोधनम्-सत्यवादनम्
२०.६.६. मनवाभ्युदयकरांशानां बोधनम्-कृतज्ञता
२०.७.उपसंहारः

## २०.०. शीर्षिकायाः अर्थः

प्राणैः = असुभिः; कण्ठगतैः, कण्ठ = कण्ठम्; गतैः = प्राप्तैः; अपि = च; कर्तव्यम् = आत्मनः वा मनवानां वा श्रेयस्करत्वेन यत् उपदिष्टं तत्; एव = केवलम्; कर्तव्यम् = अनुष्ठातव्यम् ; इति शीर्षिकायाः अर्थः।

## २०.१. शीर्षिकायाः अभिप्रायः

मानवजीवनाय नीतिः (Code Of Conduct) आरचिता अस्ति। सा च नीतिः मनवानाम् अभ्युदयाय, शान्तियुतसहजीवनाय च समर्था भवति। कदाचत् तद्दशनीति - अनुसरणे प्राणानाम् अपि हानिः जायेत। परं प्राणत्यागाय अपि सिद्धो भूत्वा कर्तव्य-तानीतिम् एव अनुसरेत्। आसन्न- मृत्युरपि धर्मस्यउनीतेः विरुद्धं न समाचरेत् इति शीर्षिकायाः अभिप्रायः।

## २०.२.कर्तव्यम् - धर्मः

विदितचरम् एव हि एतत् सर्वेषाम् अपि विदुषां यत्,अहितनिवृत्तिपूर्विका हितप्राप्ति-प्रयोजना च धर्मस्य सेवा कर्तव्या सर्वैः मानवैः इति। कः नाम अयं धर्मः? किम् अस्य मूलम् ? किम्प्रयो- जनः अयम् ? इति एतेषां प्रश्नानां समाधानं प्रथमतः देयं भवति।'वेदेन प्रयोजनम् उद्दिश्य विधी- यमानः अर्थः धर्मः ' सः च विधि-निषेधरूपः। 'सत्यं वद, धर्मं चर,स्वाध्यायात् मा प्रमदः ' इति एवं रूपः। वेद्यते ज्ञायते अनेन धर्मस्वरूपम् इति करणव्युत्पत्त्या वेदशब्दः मन्त्रब्राह्मणाख्यं ग्रन्थ- राशिम् अभिधत्ते। सः च वेदः ऋक्-यजुस्-सामभेदेन त्रिधा भिद्यमानः त्रयी इति व्यवह्रियते। गुरु परम्परया श्रवणम् एव एतेषां वर्तते इति श्रुतिः इति च पण्डितसमाजे व्यवहारः समजनि। अथर्व- वेदेन सह चत्वारः वेदाः धर्मस्य मूलं भवन्ति। वेदवत् शास्त्राणाम् इतिहास-पुराणादीनां काव्यानां च धर्ममूलत्वम् उररीकृतः सुधीभिः। अतः वेदाः, शास्त्राणि, इतिहास-पुराणादयः, काव्यानि च विहितकर्मणां कर्तव्यतां, निषिद्धकर्मणां निराकरणं च बोधयन्ति।

## २०.३.काव्यस्य कर्तव्यताबोधनपद्धतिः

काव्यात् कर्तव्यताधीः सरसा, अन्यत्र न तथा। यथा कामिनी, कटाक्ष-वीक्षणादिविलासैरेव कामिनम् आवर्जयन्ती, मम इदम् अभिलषितं कुरु, अनभिलषितं मा कुरु इति अनुक्त्वा एव सर्वं सम्पादयति, तथा काव्यश्रीः अपि सहृदयहृदयाह्लाद-कारिणा व्यञ्जनाव्यापारेण एव रामादिवत् वर्तितव्यम् न रावणादिवत् इति पुरुषं कर्तव्ये प्रवर्तयति, निवर्तयति च अकर्तव्यात्। मानवैः सर्वैः अपि धर्ममार्गगामिभिः भवितव्यम्। वेदविहितनाम् अखिलानाम् अपि धर्माणाम् आचरणे अवश्यकर्तव्ये अपि विद्यार्थिनां उपयोगाय केवलं कतिचन धर्मान् निर्दिशामः।

## २०.४.विद्यार्थिनाम् उपयोगाय कतिपयकर्तव्यांशानां ज्ञापनम्

आद्यन्तशून्यस्य, निखिललोककारणस्य पुरुषोत्तमस्य देवदेवस्य पूजा सर्वैः अपि कर्तव्या। सः च सकललोकाध्यक्षः। तदाज्ञया एव वायुः वाति, सूर्यः प्रकाशते, मेघः वर्षति विश्वम्भरा च सस्यसम्पन्ना भवति। किं बहुना, विना तदाज्ञया तृणम् अपि न चलति। पुरुषोत्तमसदृशा गुरवः अपि पूजनीयाः। ये खलु अज्ञानं निरस्य, विद्यां प्रदाय, भय-आहार-निद्रा-मात्रवेदिभ्यः पशुभ्यः भेदं जनयन्ति। पूज्यपूजां ये न कुर्वन्ति

ते न खलु श्रेयसां भाजनं भवन्ति। पुरा किल मनुवंशकेतुः दिलीपः नाम राजा शक्रम् उपस्थाय दिवः भुवम् आगच्छति स्म। धर्मलोपभिया ऋतुस्नातां भार्याम् अनुस्मरन् अचिरप्रसूतां कल्पवृक्षच्छायाम् आश्रितां प्रदक्षिणक्रियार्हां कामधेनुम् अप्रदक्षिणीकृत्य एव निजराजधानीम् अगात्। स्वम् अनाराधयते तस्मै कुपिता कामधेनुः, विना मत्प्रसूतेः आराधनेन ते प्रजा न भवेत् इति शापं दत्तवती। तेन शापेन सः चिरम् अनपत्यः भूत्वा, तत् नयनानन्दिनीं नन्दिनीमाराध्य वंशकर्तारं कीर्तिमन्तं च तनयं रघुनामानं सुदक्षिणायां लेभे। अतः एव कविकुल- तिलकेन कालिदासेन अभिहितम् - 'प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः' इति।

## २०.५.महनीयतायाः साधनम्

सन्ति खलु मानवानां शरीरं बुद्धिः आत्मा चेति त्रयः भागाः। यद्यपि व्यायामादिना निज- शरीरं पोषयन्तः जनाः मांसलाः दर्शनीयाकृतयश्च भवन्ति,तथाऽपि बुद्धिबलराहित्येन पशुसहोदराः कथ्यन्ते। आत्मानम् उपेक्षमाणाः ये बुद्धिं परां पुष्टिं नयन्ति ते राक्षसाः इति आख्यायन्ते। ये च शरीरं बुद्धिं च निजवशे निधाय आत्मगुणान् अपि पुष्णन्ति ते खलु महात्मानः इति अभिधीयन्ते। तादृशाः महात्मानः तत्र तत्र लोके विरलाः दृश्यन्ते। कः महान् इति प्रश्ने धवलदेहः सालप्रांशुः व्यूढोरस्कश्च पुरुषः न भवति महान्। कृशशरीरः अपि विदितसकलशास्त्रः सकलकलाकुशलः अपि आत्मगुणरहितः पुरुषः न भवति महान्।अनधीयानः अपिदया-आशौच-सत्य-क्षमादि-आत्म गुणसनाथः एव महान् इति वक्तुं शक्यते।अत एव संस्काररहितेनापि पुरुषेण दया-आशौचादिकम् आत्मनः गुणाष्टकम् उपार्जनीयम्।

## २०.६ मनवाभ्युदयकरांशानां बोधनम्-आत्मनः गुणाष्टकस्य साधनम्

### २०.६.१ मनवाभ्युदयकरांशानां बोधनम् - दया

दया नाम परहितचिन्तनम्। तदात्वे व्यथाजनकम् अपि यत् उत्तरकाले सुखजनकं तत् उच्यते हितम् इति। प्रियं नाम तात्कालिकप्रीतिजनकम् अपि यत् उत्तरकाले दुःखजनकम्। मानवैः सर्वैः अपि प्रियं हितं च यत् भवति तत् एव वक्तव्यम्। प्रियम् अहितं न सन्तुष्टिं जनयति आयतः बाधाजनकत्वात्।अप्रियम् अहितं न मुदे कल्पेत।उभयथापि अपि अश्रेयस्करत्वात्। प्रियं हितं च यत् भवति तदेव कथनीयम् आदरणीयं च।तादृशं प्रियहितं दुर्लभं खलु अस्मिन् महीतले अत एव उक्तम्

भारविमहाकविना 'हितं मनोहारि च दुर्लभं वचः' इति। अतः एव -

**अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ' इति**
**सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यम् अप्रियम् ।**
**प्रियं च न अनृतं ब्रूयात् एषः धर्मः सनातनः ।।**

इति प्राचीनोक्तिः सङ्गच्छते। यः खलु आत्मना समं सर्वेषु भूतेषु दयां प्रदर्शयति स दयालुः इति कथ्यते। तादृशः पुरुषः इह लोके सर्वैः स्तूयमानः महतीं कीर्तिं लब्ध्वा परत्र स्वर्गसुखानि अनु- भविष्यति। पुरा सिंहोरुसत्त्वः पुरुषसिंहः दिलीपः सिंहेन हन्यमानां गां रक्षितुकामः स्वदेहम् आमि- षपिण्डम् इव क्रूरसत्वाय सिंहाय समर्प्य, धेनोः प्राणरक्षणम् अकार्षीत्। औशीनरः शिबिः नाम कश्चित् राजनृशंसेन श्येनेन हन्यमाने, अतिकरुणम् आक्रन्दति कपोतकपोतके, सञ्जातकरुणः सः राजा कपोतप्राणत्राणाय श्येनस्य आहारदानाय च स्वशरीरात् मांसम् उत्कृत्य उत्कृत्य यावत् एकस्यां घटायां न्यक्षिपत् तावत् कपोताधिष्ठितां अन्यां घटां नम्रां दृष्ट्वा स्वयम् एव घटायां न्यविक्षत्। तदा तुष्टाः देवाः पुष्पाणि अवर्षन्। दुन्दुभिध्वानम् अकुर्वन्। श्येनकपोतौ च इन्द्राग्न्योः रूपे आस्थाय अभीप्सितान् वरान् महाराजाय दत्वा यथागतं जग्मतुः। किं बहुना, जीमूतवाहनः नाम कश्चित् विद्याधरःप्राज्यं राज्यं परित्यज्य गुरुशुश्रूषार्थी वनं गत्वा, तत्र मलयवतीं नाम सिद्ध- सम्भवां कन्याम् उपयेमे।ततः दशदिनाभ्यन्तरे एव विहङ्गराजेन हन्यमानं नागराजेन प्रेषितं नाग- कुमारं त्रातुकामः स्वप्राणान् अर्पितवान्।अनेन एतत् सुव्यक्तं भवति यत् प्राणैः कण्ठगतैः अपि प्राणिनां रक्षणम् अवश्यकर्तव्यम् इति।

### २०.६.२ मनवाभ्युदयकरांशानां बोधनम्-क्षमा

आत्मगुणेषु अन्यतमः गुणः क्षमा नाम। यया विना क्रियमाणानि अपि महान्ति तपांसि भवन्ति निरर्थकानि। अतः एव बाणेन युक्तम् उक्तम् - 'क्षमा हि मूलं सर्वतपसाम्' इति।उत्तरस्मिन् काले भृशम् इयम् उपकरोति।अतः एव इदं वचः न व्यभिचारि यत्'न तितिक्षा समम् अस्ति साधनम्' । यः च क्षमावान् न भवति,तस्य कार्याणि न सिध्यन्ति।

### २०.६.३ मनवाभ्युदयकरांशानां बोधनम्-असूया

गुणेषु दोषाविष्करणम् असूया।तया विरहितः पुरुषः अनसूयुः इति कथ्यते।सः च समस्तभोग- भाजनं,पुण्यवतां निवासं श्रेयसां निधानं स्वर्गाभिधानं,स्वर्गाभिधानं धाम लब्ध्वा निस्सीमानमानन्दं लभते।

## २०.६.४ मनवाभ्युदयकरांशानां बोधनम्- अकार्पण्यम्

अकार्पण्यं नाम दैन्येन विना जीवनम्। केचित्तु धनवन्तः अपि यथाशक्ति धनम् अव्ययतः दुर्गतेभ्यः अपि हीनां दुर्गतिम् अनुभवन्ति। अतः एव उक्तम्- सति विभवं न जीर्णमलवत् वासाः स्यात्। न रक्तम् उल्बणम् अन्यधृतं वा वासः बिभृयात् स्पृहानाम् - परेषां वस्तुषु लिप्साभावः। ये खलु अस्पृहासहिताः भवन्ति ते स्वजीविते बाधां न अनुभवन्ति। परेषाम् उत्कर्षं वीक्षितुं ते शक्नु- वन्ति। न कस्य अपि आज्ञावशवर्तिनः ते भवेयुः। राजानम् ईश्वरम् अपि वा ते तृणाय मन्येरन्। अत एव उक्तं विशाखदत्तेन-' निरीहाणाम् ईशः तृणम् इव तिरस्कारविषयः' इति। अतः सर्वैः अपि आत्मगुणसम्पन्नैः भवितव्यम्।

## २०.६.५ मनवाभ्युदयकरांशानां बोधनम्-सत्यवादनम्

सत्यवादी सर्वैः पूज्यते। अतः एव औपनिषदी सरस्वती 'सत्यं वद, धर्मं चर ' इतिमुक्त- कण्ठम् उद्घोषयति। सत्यवचनेन कीर्तिप्रतिष्ठे लभ्येते। सापराधः अपि पुरुषः सत्यवादेन बन्धनात् मुच्यते। प्राणाः अपि च रक्षन्ते। सुखं च प्राप्यते। पुरा हरिश्चन्द्रः नाम कश्चित् राजा विश्वामित्रेण बहुधा पीड्यमानः अपि सत्यं न अवदत्। अखिलम् अपि राज्यं दातुम् इच्छामि न एव असत्यं वच्मि इति उत्तरं दत्त्वा असत्यवादिनं राजानं कर्तुं यतमानाय गाधेयाय राज्यं सर्वं ददौ। भार्याम्, पुत्रम्, स्वम्, च विक्रीय महतः क्लेशान् अनुभूय सत्यसन्धः इति कीर्तिं लेभे। व्याघ्रः कस्मिंश्चित् अरण्ये तृणानि चरन्तीं गां दृष्ट्वा हन्तुम् उद्यतः। गौश्च स्व-तर्णकस्य मुखं वीक्षितुं पयो दातुं च सदयं तं घातुकम् अर्थितवती। अङ्गीकृतं च तद्वचनं तेन। गृहान् गत्वा , स्व-तर्णकाय पयो दत्वा, व्याघ्राय आहारः भवामि। वत्सश्च अयम् अविदितलोकः। रक्षत इमम्  इति इतराभ्यः गोभ्यः निवेद्य स्ववत्साय नीतीः उपदिश्य व्याघ्रसमीपं जगाम। दयायत्तचित्तः सः व्याघ्रः अपि सत्यवादिनीं तां गाम् अभ्यमुञ्चत्। एवं कदाचित् प्राणाः अपि रक्ष्यन्ते।

## २०.६.६ मनवाभ्युदयकरांशानां बोधनम्-कृतज्ञता

कृतज्ञता इति अपरःगुणः गुणानाम् उत्तमः।उत्तमगुणैः सर्वैः अभ्यर्थनीयः च। कृतं जानाति इति कृतज्ञः, तस्य भावः, कृतज्ञता। कृतज्ञता च परैः कृतस्य उपकारस्य अविस्मरणम्। कृतज्ञतारहितः पुरुषः कृतघ्नः इति व्यपदिश्यते। सः च एवं निन्द्यते।

**मित्रद्रोहः कृतघ्नः च यः च विश्वासघातुकः।**
**त्रयः ते नरकं यान्ति यावत् चन्द्रदिवाकरम्।'**

अचेतनश्च कृतज्ञः अपि एवम् अभिनन्द्यते–

**'प्रथमवयसि पीतं तोयम् अल्पं स्मरन्तः,**
**शिरसि निहितभाराः नारिकेलाः नराणाम् ।**
**सलिलम् अमृतकल्पं दद्युः आजीवितान्तम्**
**न हि कृतम् उपकारं साधवः विस्मरन्ति ।।'**

ततः जगत्याम् अस्यां, कीर्तिप्रतिष्ठाकामुकैः सर्वैः अपि मानवैः धर्मसंग्रहः अवश्यं कर्तव्यः।

## २०.७.उपसंहारः

एवं मानवः जन्मतः प्राप्तां प्राकृतिकताम् परिहरेत्।श्रद्धया संस्कारं संसाधयेत्। कर्तव्यानि च जानीयात्। तान्येव च पालयेत्। आत्मनः श्रेयोदायकान् गुणान् सम्पादयेत्। मनवतायाःऔन्नत्यं प्रकटयेत्। कदापि धनलोभाद्वा, कीर्तिकण्डूत्या वा अधर्माय वा अन्यायाय वा पालकः नैव भवेत्। कण्ठे भवन्तु नाम प्राणाः, आप्तोच्चरितमेव पालनीयं भवति।

**स्वावलोकनप्रश्नाः**

१.आत्मनः गुणाष्टकं प्रतिपादितम्, तत्र अष्टौ गुणाः के ?

२.कर्तव्यं नाम किम् ? धर्मः कः ? कर्तव्यं कथं साधनीयम् ?